त्रमेभाष्यकृता एकाच स्त्रीवलीति वेसुक्तं यन्तूक्तं कैयटेनेति उरणरपर इति सूत्रे भाष्येप्येवं अनर्थ

कस्येति नानासमुदायांतर्गतनिरर्थकैकारसमुदायस्यायमेकइकारस्तादृशोऽवयवइति दिगिति किं
च यद्यपि व्यपदेशिवद्भावेनासिद्धमिति तथापि गौणत्वान्नेति यस्य भांतिस्तंमति सूत्रारंभइति पूर्वग्रंथ
विरोधः कैयटस्य कुरुतेइत्याद्यर्थमनयारीत्यासूत्रस्याभ्यांतंमसावश्यकत्वादिसाहुः तरप्तमपौ घः न
द्यास्तइति तृधातोरपिगुणेरूपमेतत् साहचर्येणेति प्रत्ययाप्रत्ययोरितिपरिभाषयाचैसपिबोध्यं अप्र
येति अप्रत्यययोरपि घसंज्ञायांनसाहचर्यात्तद्रूपकल्पयोरप्रत्ययोरपि ग्रहणंस्यादितिभावः सुप्सुपेति
समासइति पूर्वपदस्यतत्सदृशेनाश्रयेणैकत्वेनसामानाधिकरण्यात्जरतीवाकृतिर्जरद्वाकृतिरितिवत्
स्त्रियाः पुंवदितिपुंवद्भावेन जातेश्चेति निषेधात् उपमानानीति समासस्तु न आकृतिशब्दस्यायमेय
वाचकत्वेपिसाधारणधर्मावाचकत्वात् साधारणधर्मोह्यत्रविसंष्ठुलत्वादिना आकृतिरवयवसंस्थानं

महिषीशब्दस्य महिष्याहृतिसदृशो व्याहृतिलौकिकः विशेषणामिश्रस्यापि न प्रवृत्तिः तक्रकौण्डिन्यन्यायेनो
१ 9 पमानव्यतिरिक्तस्येव विशेषणस्य प्रवृत्तेः। उपमानसमासेऽत्र च पुंवत्कर्मधारये सत्यपि दुर्वारत्वाच्च
उपमानसमासेऽपि कर्मधारयत्वांगीकारात् अतएव मृगचपलेत्यादौ पुंवद्भावः दर्शनीयापतिरित्या
दौ लक्षणासत्वेऽपि न पुंवद्भावः हन्तो हन्तेः प्रावृत्तसमानाधिकरणे एव तत्प्रवृत्तेः अत्र च व्याख्यानमेव
शरणमित्याहुः स्वार्थिकत्वादिति तत्वं च प्रकृत्यभिहितार्थद्योतकत्वं तथा च प्रकृत्या सामानाधिक
रण्यं स्पष्टमेव स्वार्थिकाः प्रकृतितो लिंगवचनानीतिवचनात् स्त्रीत्वं च नास्तीति षष्ठीसमासान्तर
स्य पुंस्त्वाच्चेति भावः बहुगणवतुडति इतीति वतुसाहचर्यात् डतिरपि तद्धित एव न तु प्रातेर्डतिः १
ननु संख्याप्रदेशेषु कृत्रिमन्यायाप्रवृत्तेः किं बहुगणेनेत्यत आह नञ्चेति अनियतेति अनियत

संख्यावाचित्वं नाम नियमेन संख्यावाचित्वाभावः एवं च अर्थांतरवाचित्वे सति बहुत्ववाचिनां चेन्नव
ति संख्याकार्यं तर्हि बहुगणयोरेवेति नियमपर्यवसानात् तेनेति बहुत्वानियतद्वित्वैकत्वघाचिनो
रेकद्विशब्दयोः द्वित्वैकत्वानियतत्रित्वादिवाचिनां त्र्यादीनां च न नियमव्यावर्त्यत्वमिति भावः विशेष्य
विशेषणभावाभ्यां तेषां निर्धारणप्रतियोगितावच्छेदकानां त्र्यंतत्वान्न नियमार्थत्वं दुरुपपादमिति न
न्विति शंकाशयः संज्ञानियम इति संज्ञाकरणरूपस्य स्यार्थः अयं भावः शब्दार्थसंबंधानामनित्यताप
रिहाराय संज्ञासूत्राणि नियमार्थानीति सिद्धांतः तन्नियमस्य संज्ञिभिन्नव्यावृत्तिः फलं एतन्मूल
क एव कृत्रिमाकृत्रिमयोरिति न्यायः व्यावर्त्यं भिन्नं च कृत्रिमम कृत्रिमं च यथा संकेतज्ञं प्रति गोपाल
मानयेत्युक्ते कृतसंकेतमपि गोपालांतरं हित्वा स्वगृहसंकेतितं गोपालमेवानयति संकेतज्ञ एव चैत्र

मानयेष्पुके असंकेतितं पुरुषमात्रं हित्वा चैत्रमेवानयतीति लोके दृष्टं तत्रमान्यापेक्षेति यथेह कृ
१० 10 त्रिमाकृत्रिमयोर्व्याहृत्तिर्यद्यपि दृष्टा तथापि अकृत्रिमाव्याहृत्तिर्गमकस्यातिशदंतायाइति
पर्युदासस्य सत्वात्कृत्रिमांतरव्याहृत्तिरूपविशेषमपेक्ष्य वक्तुर्गतेतिनियमः यत्रतु नगमकं तत्रा
कृत्रिमव्याहृत्तिर्यथा वृद्धिरादैजिति इदंतु तत्वं संख्यात्वेनलोकेप्रसिद्धानां पंचादीनां संग्रहार्थं
नेदं संज्ञाकरणं लोकसिद्धत्वात् किंत्वधिकसंग्रहार्थमेव संज्ञाकरणं बह्वादीनां॰ एवं बहुतर
व्याहृतिवत्संज्ञाकरणस्याधिकसंग्रहोपि फलं नतस्यान्वकरणं वायं संज्ञानियमः एतेन कृत्रिमांत
राप्रसिध्यानियमफलनाप्रसिद्धाविंसोऽयं नियम इति परास्तं नियमस्य रूपमात्रप्रदर्शनादिति १०
दिक् पूरणप्रत्ययांतोत्तरपद इति इति पूरणप्रत्ययांतस्यार्धपूर्वपदत्वासंभवादाह उत्तरेति

अर्हं स्वर्यासरे ष्विति नमधीष्व इत्यादिषु स्नांताषट् तद्विघातकत्वादिति षट्संज्ञा ह्याराजस
सुकृनिमित्तत्वाभावादित्यर्थः तदवस्य एवेति नुड्विधेकवाक्यतापन्नषट्संज्ञाया अविवि
भक्तिसापेक्षत्वेनांतरंगत्वाभावादात्वस्यैव प्रथमं प्रवृत्तेर्दीर्घस्तदवस्थ इत्यर्थः नांतत्वे सति सांख्
ख्यावाचित्वरूपषट्संज्ञायां नकारस्योपजीव्यत्वादत्र विधित्वमित्याह किंचेति इतिभाष्यमिति म
ध्योदात्तत्वमित्यर्थः सावकाशः सुप्त्सु पोजन्ममित्यस्याप्राप्तेः किं दीर्घग्रहणेन अष्टाभिरित्यत्रा
प्रवर्त्तकेन अष्टनूशब्दांतोदात्त इतीति अष्टन इति सूत्रेंतोदात्ता उत्तरपदादिरित्यतोंऽतोदात्तपदा
नुवृत्तेराकारसंमतत्वात् एतेन कदष्टन्न इत्यस्याप्यपूर्वपदप्रकृतिस्वरेण घुदात्तत्वात्कदष्टा
विति शासि विभक्त्युदात्तत्वं सावकाशमिति परास्तं अंतोदात्तत्वाभावे नाष्टन इति विभक्त्युदात्त

त्वस्याप्राप्तेः ननु ज्ञापकस्य स्वरप्रकरणस्थत्वात् षट्संज्ञाया अनुपस्थितत्वात् बाधकषट्स्व
११ रनिमित्ततया तदुपस्थितौ षट्स्वरस्यैव प्रथममुपस्थितत्वाज्ज्ञापवाक्ये यदि ह्यस्योपोत्तममि
ति स्वरो न स्यात्कृतात्वे तर्हि दीर्घग्रहणवैयर्थ्यमित्यर्थापत्तेः साक्षादुपपादकविषयत्वस्याभि
तत्वाच्चेति चेन्न षड्व्यतिरेकेणानुपपत्तिप्रतिसंधानं तस्यैवार्थापत्त्याकल्प्यत्वात् आपादकष
ट्स्वराभावस्य षट्त्वविरहप्रयुक्ततया संज्ञायाः प्रथमोपस्थिततया ज्ञाप्यत्वौचित्यात् कृतात्वे षट्
स्वरस्याप्रमितत्वे न तज्ज्ञापने दीर्घग्रहणवैयर्थ्यस्य दुरुद्धरत्वाच्च अष्टनामित्यत्र षट्त्रीसेवस्वरा
सिद्धौ अष्टन इति सूत्रमेव व्यर्थं स्यादिति शङ्कः तदुक्तं अनियम्यस्य नायुक्तिर्नो नियंतोपपादक ११
इति आत्वपक्षे यदि षट्संज्ञा न स्यात्तदा दीर्घादिति व्यर्थं स्यादित्येवोपपत्तेः न च यदि षट्स्वरो न

स्यादित्येवापादकमस्त्विति वाच्यं षट्संज्ञानिमित्तकस्वराभावस्य षट्संज्ञाव्यतिरेकप्रयुक्तत्वात्तस्या
एव प्रथमोपस्थितत्वात् षट्स्वराभावस्यापादकत्वे तु तदभावस्यैव साध्यत्वं स्यात् अन्यथा विप ६५
र्ययापर्यवसानात् आपादकव्यतिरेकसाधकप्रमाण एव तर्कस्य सहकारित्वात् यावता विनेति
त्वैवयर्थ्यप्रयोजकव्यतिरेकप्रतियोगिन एकस्यानेकस्य वा ज्ञाप्यत्वात् उपज्ञापनं विना दीर्घग्रहण
वैयर्थ्यानुद्धारात् आत्वाभावपक्षे मध्योदात्तबाधो माभूदित्येतदर्थस्य दीर्घग्रहणस्य आत्वाभाव
पक्षे विनावैयर्थ्यात्तादवस्थ्यादिति भावः उदात्तत्वं स्यादिति आदिनामभावान्ङ्युपोत्तममिति स्या
प्राप्तेरिति भावः उक्तप्रकार एवेति यनुसंनिधानान्नकारस्थानिकाकारस्यैव ग्रहणान्न दोष इति तत्र धु
प्रकृतिमाङितिपाठे प्रकृतिशब्दस्य ससंबंधिकत्वात्संनिहितप्रकृतिग्रहणेप्याकारस्य तथात्वान्नकार

स्थानिकाकारग्रहणेमानाभावात् एतेन भाष्योक्तं घुसंज्ञतीतिवदिदमितिपरास्तं यत्तु वस्तुतस्तु
१२ हलोयमामिति लुप्तनिर्दिष्टद्वितीयनकारप्रश्लेषेणानकारस्थानिकाकारो व्याख्येयइति तदपि न स्व
रदोषोपन्यासपरभाष्यप्रामाण्येन कारप्रश्लेषस्य प्रमाणशून्यत्वबोधनात् यदुक्तमिति एतदभि
धायाहारे भाष्यमेवमानं अष्टनोपि तद्धितेननुट्सिद्ध इत्यर्थः नचाष्टनो यदुक्तं तस्य अप्रापिस्या
दितिविपरीतापत्तिः योगविभागस्येष्टसिध्यर्थत्वनियमात् तेषु सत्त्वमिति यथोद्देशः अथ
मः आकारान्ते षट्त्वं ज्ञापयकात् प्रश्लेषादाकारस्य षत्वमिति त्र्यः योगविभागः षड्भ्य इतीतिपक्ष
चतुष्टयरूपेषु इत्यर्थः अष्ट इति वेति श्च इति वेदान्तो लोप इति भावः प्रियाष्टाइत्सपीति सि गोत्ता १२
त्वादेशलाभावे आत्वे सवर्णदीर्घे च रूपमेतदिति प्रियाष्टाइत्यपीति सावित्रं रूपं तत्रापि विव

।स्थिनत्वादिति दीर्घादिति ज्ञापकात् कथंचिदिति वस्तुतः सूत्रमते मूर्धन्यपक्षानुहत्ते स्तत्रसत्वेन
णग्रहणंव्यर्थमेवेति कथंचिदिति अतएव षेढाविसेवसिद्धेमूर्धन्यग्रहणंसार्थकं तस्मात्वंतुला
सणीकत्वसंपादनमेव ग्रहणंतु विध्यंतरबोधनद्वाराऽनित्यत्वज्ञापनार्थंतेनदुर्भवानीत्यादिसिद्धि
मित्याहुः भगवानाहेति शरपूर्वग्रहणेसत्युचिच्छिषतीत्यादावंतरंगत्वानुक्तिसन्नर्–ट्टिपूर्वत्वासि
द्धमिति चुत्वास्यासिद्धत्वात्तत् शर्दृस्यद्विवतकारशेषेप्राप्तेछशेषार्थंखपूर्वग्रहणंकर्त्तव्यमिति
वार्त्तिकं तत्प्रत्याख्यानायोक्तंसिद्धकांडे अभ्यासजश्त्वमत्वतुकोरिति वार्त्तिकं तत्र एत्वतुकोरितिवि
षयनिर्देशो नकर्त्तव्यः असज श्त्वचर्त्वेसिद्धमिसेवे वक्तव्यं एवं चहलादिशेषे कर्त्तव्ये चुत्वरूप
चर्त्वस्यासिद्धत्वान्नकारस्यचकारे कृतेहलादिशेषेण छकारेनिवर्त्तितेरूपंसिध्यतीत्याहुरस्यार्थः उ

भोसाभ्यासस्येति वचनात्पूर्वत्रासिद्धीयमद्विर्वचनइत्यनित्यमिति भाष्याशयः ~~कारा~~वत् नचका
१३ 13 कादिवदिति यदा किंचिद्धि शिष्यं वर्त्तमानतया प्रतिपाद्यते तदा तद्विशेषणमिति व्यवछिद्यते य
द्वात्ववर्त्तमानतया तदा उपपन्न स्यात्वेनेति बोध्यम् ॥ ॥इति पंचममाह्निकं॥ ॥ श्री॥ ॥

१३

३५ विं च तादृशानन्वयितावच्छेदकायुगे च यादृशि सा शक्यानन्वयितावच्छेदकपरिचायकत्वादीत्यादि ने
दृशानामुपस्थितवर्णोवृत्ति धर्मवज्ञातृकत्वेनोपपन्ना ननु पदस्थितस्य वर्णत्वादिधर्मेण ग्राहकत्वेमाना
भावादित्ति भावइतिप्राकु स्ववाच्यवाच्येइति वाच्यवृत्तिधर्मोपलक्षितेइत्यर्थः यथाकृतं तु न युक्तं प्र
ताहारवाच्यमध्यगानामनुच्चारितत्वेन तद्वृत्तिवाचकत्वग्राहकत्वस्याणुदित्सूत्रेऽसंभवात् अत
एव तु नञ्ग्रहणाया आदेशो निर्दिष्टादिभि अन्यत्वेनेति ग्राहकसूत्रे वाक्यापरिसमाप्तिन्यायेन ग्रह
पदेनाग्रहणेनेत्यर्थः नास्तीत्युक्तमित्ति अपलभेदेनेति नाऽभेदाविषयत्रोनामित्यर्थः ननु वाच्ये को
कंतन्नसरूचवृत्तेति कथं सूत्रेण ग्रहणं स्यादित्यत आह प्रकृतिभावदर्शनेनेति ननु कस्य ग्रहणेन
ग्रहणमवज्ञाप्यतां ग्रहणं लसत्वशंकयेति दृष्टसर्थं स्यात् किं संज्ञाज्ञापनेनेति चेन्न अश्रुवंग्राह

अज्झगादिश्च स्याहोर्ष्विकारस्य स्वसजातीयसंग्राहकतायाः ह्रस्वत्वादिकोयणिस्त्रापि शकारं
स्ववाच्यदीर्घसजातीयं ग्राहयेदित्यभिप्रायेण शंकते नन्वेवमपीति दीर्घविश्रांत्येति अकारस्य स
र्वत्राणुदित्सूत्रेणैव स्वसवर्णग्राहकत्वात् स्वसजातीयसंग्राहकत्वस्यकारे सत्वेपि सवर्णपदस्यासा
सत्यासवर्णे एव विश्रांतिर्न तु शकारसंग्राहकत्वमिति शकारस्य न दीर्घप्राप्तिरिति भावः अन्येतु
ऌकृपदवाच्यत्वं दीर्घकारे तत्सवर्णत्वं शकारे इति यणस्यात् अकृपदवाच्यतानु न दीर्घकारे किंत्व
कृपदवाच्यसवर्णत्वं तथा चवाच्यजातीयदीर्घ एव लक्षणापर्यवसानमिति न शकारस्याकृपदसं
ग्राह्यत्वमिति न दीर्घप्राप्तिरित्याकुः वाच्यतायां दीर्घे इति वाच्यह्रस्वसवर्णतायाम् इत्यर्थः यथाश्रुते
दीर्घकथं विश्रांतिरिति चिंत्यं वदेमेति साध्यवकृमशाक्यापुंगानमितस्यादेपुमः स्वयीतिरत्वमसंगाहे

५० त्यर्थः पश्वेकत्वेति पशुना यजेतेत्यादावनेकपशुकरणकत्वापत्तिवारणाय विधेयपशुविशेषणम्
मेकत्वं विवक्षितमित्यर्थः अत्रेदं बोध्यं अङ्गुलिसचह्रस्वव्यक्तिमात्रवृत्त्यत्वनिर्देशः अस्यच्चावि
त्यादेर्ह्रस्वदीर्घप्लुतवृत्तिव्यापकजातिनिर्देशः तेन दीर्घाणामनणत्वमष्टादशसंग्रहश्च सिद्धः
ऊङ्कोचीत्यादौ व्यापकजातिनिर्देश एव जातिनिर्देशप्रयुक्तातिप्रसंगवारणाय तपरसूत्रं अत्रापि
पक्षे उदिदित्यादिसूत्रं कर्त्तव्यमेव ककारादिपंचकवृत्त्येकजात्यभावात् अप्रत्यय इति तु भाव्यमाने
नसवर्णानां ग्रहणं नेति ज्ञापनार्थमिति भट्टाः अस्मे तु ज्यादादीयस इति सूत्रे ज्यादित्यत्र वक्तव्ये दीर्घ
निर्देश एतत्परिभाषाज्ञापक इति तत्र सूत्रे भाष्ये स्पष्टं एवं चाप्रत्यय इति व्यर्थमित्याभाति तथापि
जातिनिर्देशप्रयुक्तातिप्रसंगाभावेऽपि गुणाभेदकत्वेन त्यदादिभ्य इत्यादौ सानुनासिकवारणायाप्रत्यय

कृतार्ज्ञापनापेक्षया सवर्णसंज्ञया ग्राहकत्वस्य क्लृप्ततया संज्ञाज्ञापनस्यैवौचित्यात् न च ग्राहकत्वं
क्लृप्तमेवेति वाच्यं संज्ञाद्वारकस्यैव क्लृप्तत्वादिति बोध्यं सूत्रान्तरेति नन्वानुमानिकं वचनमेव सूत्रान्त
रमिति चेन्न तुल्यास्यसूत्रस्यैव स्थानभिन्ने प्रवृत्तिज्ञापनेन लाघवमित्याशयात् यत्नः आकारप्रश्लेष
षः न विस्मर्तव्य इति ग्राहकसूत्रसत्वासत्वयोरावश्यकत्वादित्यर्थः नन्वेवमपि प्लुतादिप्रत्याहारेषु
ग्रहणकशास्त्रासत्वादेकव्यञ्जनेरेव प्लुतत्वादिभिस्थानि इत्याशंसावकाशस्य प्लुतो सन्नीत्यस्य अचाल
सत्तामित्यत्रोभयोरप्लुतत्वात्सन्धिलोपो न स्यादिति तत्र जातिपक्षाश्रयणस्यावश्यकतया जातिपक्ष
माश्रित्यात्र सूत्रेऽण्ग्रहणमेव न कर्त्तव्यमित्यभिप्रेत्याह वार्त्तिककारास्त्विति ग्रहेकत्वेति ग्रहं सं
माश्रित्य सत्र प्राजापत्यान वयग्राहाउति क्लृप्तनवानां संस्कार्यत्वादुद्देश्यग्राहकत्वमेकत्वमविवक्षितमि

५।

स्यार्थोपस्थितिं वदंति एतन्मते प्रतीतस्यात्रस्याप्यकत्वात्कथं तेन लस्यार्थप्रतीतिरित्यतोन्य
था वर्णयंति लाक्षणिकं पदमेव स्वशक्यार्थसंयुक्तत्वादिसंबंधेन लक्ष्यार्थोपस्थापकं इति तत्रा
द्यमते ऐच्छदोपस्थाप्यैकारौकारयोरतपरत्वात्प्लुतोपस्थितिः संज्ञायां कृतमिति रीत्या वारणी
या द्वितीयमते ऐच्पदस्योपस्थापकत्वात्तदस्य च तात्परत्वात्प्लुतव्यावृत्तिरित्युत्तरार्थः सामर्थ्या
नाश्रयणात् सूत्रोपस्थाप्यदीर्घवर्णवृत्तिसवर्णत्वं सूत्रे आरोप्य ऐ औ च स्वसवर्णस्य संज्ञेति
परंपरया प्राप्तुं तत्कालात्तत्कालग्रहणप्रसंगे तत्कालग्रहणमधिककालव्यावर्तकं बोध्यं
वक्ष्यमाणेति उकालोज्झ्रस्वसंज्ञ इति वाक्ये ओ इत्यत्वात्सवर्णग्रहणाद्दीर्घप्लुतयोरपि ह्रस्व
संज्ञा स्यात्तच्छ्राव्यस्यार्थे मणुदित्सूत्रे शब्दसंज्ञे स्यनुवर्त्य सप्तम्या विपरिणम्य शब्दशास्त्रीयसं

इतिकर्त्तव्यमेव अभेदकपक्षज्ञापकं वा अत एव बालपदोपादानं वर्त्तिके इति प्राहुः उक्तरीत्येति अ
लघरस्थाने ऋ ग्रहणं वा लृवर्णस्य ऋवर्णग्राहकत्वं सुतरां सर्वार्थः इति दिगिति दिगर्थस्तु
मीमांसकमर्यादा वैयाकरणैरादरणानहेव उ ये यि वचनिस्तत्रोपेसविवक्षितं नञादिनु विवक्षितं आ
ई धातुकर्मस्तत्र बलादिलं विविवक्षितं अदसो सेरित्यत्राप्येकत्वं विवक्षितं गुणाद्यस्येकत्वविवक्ष
यास्तिद्ध एकग्रहणं विधेयसंख्यानविवक्षितेत्यर्थे ज्ञापकमिति तस्मात्प्राख्यानमात्रेण निर्वाहा
यस्मसपानासूत्याकर्त्तव्येति पंचपादिसूत्रभाष्यात्तथा ची एग्ग्रहणमेव लघुभूतं कर्त्तव्यं स्थलादि
घृणत्वाजानिपक्षाश्रयणमिति सारतां विस्तरः तपरस्तत्कालस्य द्विविधइति तत्रेण सूत्रोनिर्देशइत्य
र्थः परंपरासंबंधेनेति केचित्तु लाक्षणिकपदानुपपत्तिरिति शक्यार्थस्तेन स्वसंयुक्तत्वादिसंबंधेन ल

५२ स्वरूपस्येह स्वरूपस्य लकारस्येति व्याख्यानेनतु लेशो गोरवं चतत्रैवेति मूलस्वरसविरुद्धं चेतिवो
धं व्याख्यानापेक्षया लाघवादाह रेफद्वयमध्यं वेति उपसर्गाद् ऋति इत्यादौ । क्लृप्तीति स्थिते
द्वयोः स्थाने ऋति ऋ वेति ऋकारो दग्धा विधेय इत्यर्थः पाठसंदिग्धत्वाद् दृष्टमुपेक्ष्याप्याह अत
आदित्येवेति अभेदत्वात्तार्तनुनासिके सिद्धे तत्संख्याहकं दीर्घयत्नं व्यर्थसद् ज्ञापकमिति भावः
परोलिवं द्वित्वं लाद्दशलक्ष्याप्रतीतेः भाष्याद्यनुक्तेश्च स्वचारि नार्थ्यमतएवतुन्निरूपमितिमाकु
: परत्वादिति अतपरेषणुद्दिस्सत्रं आतोधातोरित्सत्रं नपर इति सावकाशौ विरोधएवेति
यद्यपि संख्यानसूत्रोपात्तात्तथापि संज्ञयो विरुद्ध संख्याकयाहकत्वेन फलतो विरोध इत्यर्थः
परिहारलेवेति एकाधिकरणेपविरोधात इत्यर्थः नहि भवति पंच चत्वार इति शतेपं चाशादि

ग्राम्यां कर्त्तव्यायां सवर्णग्रहणं नेति शीलस्यार्थः शास्त्रान्तेइति पंचमीसमाससत्त्वे पूर्वत्तकारेणैवो
त्तराकारेपि भिन्नकालग्रहणाभावसिद्धेः द्वितीयस्तकारो भाष्ये व्यर्थः स्पष्टइत्यर्थः अणग्रहणमि
त्संयंते सांहितापदांतस्येति सानुनासिकयकारस्य द्वित्वे त्रियकारकसिद्ध्यर्थं क्रियमाणमभेदक
त्वे गुणानामर्थ्यसङ्केदकत्वं ज्ञापयैव कल्पिकत्वं चेज्ञापयतीत्यर्थः नन्तु तत्कालग्रहणं तत्रैव
ति उपसर्गादृतीत्यत्रैव लृग्रहणं ऋसंग्राहकं व्याख्यानमित्यर्थः ऋत् च लृत् च तयोर्विग्रहे वि
रूपाणामपीत्येकशेषेणाभयग्रहणमिति भावः केचित्तु तपरः लुप्येति सूत्रे पाठः सवर्णस्ये
ति स्वरूपमिति चानुवर्त्तते षष्ठ्या विपरिणम्यते च तपरो वर्णः स्वस्य रूपस्य ग्राहकः सवर्णस्य च
कारस्य च ग्राहक इति सूत्रार्थ इति तन्न लुःपरेदेन विशेषणे विशिष्य ग्रहणापत्तेः तद्व्यावर्त्यस्य

४३ णसामर्थ्याच्च बहुव्रीहिरपीति निर्णयात् न चाकाररूपस्यैवायो यथा स्यादिति खट्वयोरित्यत्र
माभूदित्यर्थं चकारो नियमपूरक इति वाक्यं आपश्चोसि आदि· इत्ति लघुन्यासेन नियमे सिद्धे
गुरुन्यासेन सूत्रकृता विधित्वस्यैव बोधनात्· नियमाद्विधेर्लघुत्वाच्च· विशिष्टेऽर्थे वत्वाद्वि
धन्निश्च सुलभावर्णसंज्ञात्वे सैत्रीसति गौरवं रपर इति तत्पर इति बहुव्रीहिस्तद्गुणः तत्प
रं तदुच्चारणकालसदृशमिति विशिष्टसमकालासंभवाद्विशेष्यवर्णमात्रपर इत्यर्थः तदा
दिपदेर्लक्षणेन कृत्स्नेत्यत आह एतस्यैवेति ऋद् इ· मात्रपरत्वमेतच्च हस्य परोक्षापरोक्ष
योरभेदासंभवात्परोक्षत्वापरोक्षत्वसामान्येन विशेष्यमात्रपरं तत्र पदे तत्त्वमसीत्यत्र आ
नर्थक्यादिति समुदाये तात्पर्यादवयवार्थानर्थक्यमित्यर्थः यत्तु संयोगासमवायान्यत

द्तिनु समुदायलक्षणया संभवाभिप्रायेण ननु शतत्वविशिष्टाभिप्रायेण पूर्वसंख्याबाधेनैवो
त्तरसंख्याव्यवहाराद् इति बोध्यं इत्याहुरिति त्रिपुंड्योरंतर्भावात्त्व भ्रतिग्रहणं व्यर्थमेव स्यादि
त्यर्थः ननु न हि त्रिपुत्र इत्यादिभाष्यदृष्टांतेन शब्दोपात्तसंख्ययोरेव विरोधित्वं प्रकृते फलतो
विरोधेपि न संख्याव्यवहार इत्यत आह वस्तुतस्तु नेहेति शाब्दविरोध एव बाधकत्वे प्रयोजक
: इह तु सामर्थ्यादेव बाध इति भावः ननु नकारोयं सुखमुखादिर्वा कृत इद्दिति चेत् अथवात
त्कारग्रहणार्थ इति संदिग्धत्वादाह वस्तुतस्त्विति तकारविशिष्टेति ननु सहि वहो रोति सूत्रे
वर्णग्रहणात्संज्ञासमास एवास्तु विशिष्टसंज्ञात्वे किं मानमिति चेन्न आङि चाप इति सूत्रे ओ
सि परतः ओसि चेति सूत्रेणैत्वे सिद्धे ओसनुकर्षणार्थं चकारादतो भिसि स्यात्तत्तकारो धीर

५५ तदीत्याह यदात्विति अनुवर्त्तते इति तत्सामर्थ्यान्निर्देशोपि नियम एव स्वीकार्य इति भावः इ
षुसिद्धेरिति · नियमार्थत्वोपपादकाणग्रहणविरोधेनात्र पक्षे विशिष्टासंज्ञेति न शाक्यं वि
धिपक्षे तपरकरणमुभयार्थमिति वृद्धिसूत्रस्य सिद्धान्तानुरूपपाठः एकस्य युगपदुभयवै
शिष्ट्यासंभवेनोभयशेषत्वाभावात् तस्मात्ख्यापादिति अकारवर्णग्रहणं नु केन तकारेण नि
र्देशः नान्तसमुदायस्य स्वस्वरूपेणार्थवत्त्वात्प्रातिपदिकत्वाद्विभक्तिः तकारस्योपलक्ष
णत्वेन तत्कालत्वाप्रयोजकत्वमपि नादस्येन तदर्थयोभयशेषत्वसंभवे [illegible] सेव सम्भ
गिति केचित् · अन्ये तु सेत्वार्थं कुर्म्याः प्रणीयंते ताभ्यः पानीयं पीयते चेति भाष्यात् बोधित
मेकस्योभयार्थत्वमादाय संज्ञास्वरूपसंपादकस्यापि तत्कालत्वाप्रयोजकत्वं चैव च परो मा

रसंबंधेनान्यपदार्थस्यवर्तिपदार्थसंबंधित्वएवतद्गुणत्वंयस्येतिबहुव्रीहेः समुदायस्याव
यविनोविशेषणत्वेनतस्यैदेनतस्यपरामर्शेतिसमकालाप्रसिद्ध्यासूत्रस्यासंभवदुक्तिकता
यत्तिरितिविशेषणासंज्ञेत्यादायसंगतमिति नचिंत्यं असंयुक्तगवासह पलायमाने चित्रगुं पश्य
गवान्तरस्यचेसाहोवर्तिपदार्थस्यापिकार्यत्वेनतादृशनियमेमानाभावात् अपसिद्धेरपि
वर्तिनतस्यदत्तसंज्ञायानिरस्तत्वादितिप्राहुः प्राचांरीत्येति वर्णएवसंज्ञेतिरीत्यैस्यर्थः सोयंविधी
ति अनन्यविधायकमणसुनियामकमितिनुवक्तुमशक्यं एकस्योभयरूपत्वेवाक्यभेदावश्यं
भावात्सार्थैकस्यसामर्थ्याभावात्परिसंख्यारूपनियमस्यत्रिदोषदुष्टत्वाच्च नियमफलस्य
विधिपक्षेपिसंभवस्योपपादितत्वाच्चेतिभावः अभेदकागुणाइतिन्यायसूत्रस्यभाष्यसिद्धं

45 पक्षवार्त्तिकमवतारयति स्फोटस्य ह्रस्वादिना ननु वर्णा एककाला एव तु पलब्धिरेव भिन्नकालेति चेन्न
॰ उत्पत्ति विनाशप्रतीतेरनन्यथासिद्धत्वाद्बु निगतत्वेन प्रतीतेश्च प्रत्यभिज्ञाया जात्यालंबनत्वेनान्य
थासिद्धत्वाद्ध्वनिभेदेपि सैव यं गकारेत्युत्पादादृष्टत्वाद्युत तत्कालावच्छिन्नताल्वोष्ठपुटव्यापारजाः व
र्णा भिन्नकाला एव स्थाप्यये न कालभेदादिति पूर्वपक्षवार्त्तिकार्थः सिद्धं त्विति वर्णोत्पत्तावप्युपल
ब्धीनामिव कालभेदात् वृत्तित्रैविध्यं वर्णो स्वेकरूपा एव यथा लस्यादिगंतृ भेदेपि न मार्गभेद उपजा
यते तद्वदित्यभिप्रायः अवस्थिताः नियतकालाः चिराचिरवचनात् वक्ष्यसंबंधि चिराचिरका
लोच्चारणजनकयत्नात् जायमानवैकृतध्वनेरुपलब्धीनामेव भेद इति वार्त्तिकाक्षरार्थः अस्यार्थ
वृत्तिघंटानादवदेकमात्रादिवर्णाभिव्यंजकपुत्तरमनुरणनरूपेणानुवर्त्तमानो वर्णातनभिव्यंजकः

घात्पर इति वैरेकस्य युगपद्विधित्वावधित्वनिरूपकत्वयोरविरोधात् इति प्राहुः नीति पक्षे त्विदं सू
त्रं नियमार्थमेव च अभेदका गुणा इति पक्षेपि नियमार्थमिदं भट्टास्तु ननु उक्तिलाघवेन विध्यर्थत्वमेवा
स्य सूत्रस्येत्याहुः विभक्तितकारे त्विदं न प्रवर्त्तते उपसर्गाद्धृतीति परकरणात् इत्यपि बोध्यं स्वरार्थमिति
प्रत्ययग्रहणमनालोच्येदं अभ्युपगम्यते उच्चारणार्थस्यापि निवृत्त्युपायाभावान्निवृत्तिमात्रार्थत्वसंज्ञे
त्यर्थः विधिविषये उच्चारणार्थत्वनिश्चयाभावेनापूर्वविधाने न च तां तस्यैवाभिधानमित्यपि संभाव्य
नेसुच्चारणार्थस्यात्संज्ञैवोचितेति भावः प्रत्ययग्रहणसत्त्वेपि तित्वसामर्थ्यात्स्वरितप्रवृत्तिर्निष्प्रत्ययस्य
रितस्येति त्वेविनापि स्किङ्रुच्चारणार्थतैव तकारस्येत्याह वस्तुतस्त्विति तपरो वर्णः स्वात्मसू नभिधकका
त्वकयात्तक इत्यर्थे दीर्घादिवद्वृत्तिभेदेनोच्चारितस्यापि भिन्नकालत्वाद्ग्रहणं तस्यादित्यर्थकं स्ववप

56 कालं प्रतीयते-द्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयमिति शब्दांतराधिकरणस्य रागण वकारो
नित्यस्तु कथं नेयेति सुधीभिश्चिंत्यं पक्षेत्विति आशुविनाशित्वादूरात्तु ग्रहणासंभव इत्यर्थः यद्यपि वी
चीतरंगन्यायेन तद्ग्रहोपपत्तिस्तथापि तद्दितध्वाने च वर्णा नाद्विशित ध्वनिमात्रोपलब्धेस्तत्स्वीकार
आवश्यकः नित्यपक्षे चिरस्थायित्वाद्वर्णानामेव ग्रहणमित्यभिमानः वस्तुतो नित्यत्वपक्षेपि तेषां सर्वत्रा
नुपलंभाद्विभुत्वाभावेन शब्दाच्छद्यांतराभिव्यक्ति स्वीकारावश्यकत्वात्तु ध्वनिरेव स्वीकर्त्तव्य इत्यप्याहु
ः ननु स्फोटस्य ध्वनिव्यंग्यत्वपक्षे वर्णस्वीकारात्तु परादि ध्वनिभेदात्तु ध्वनिभेदे न वृत्तिभेदस्वीकारे
द्रुतायां तपरोच्चारणेप्यसंतरेतत्वाल्न ग्रहानुपपत्तिरत आह वैश्चितिति कालोपहितध्वनेरेव भे
देन स्फोटस्येत्यर्थः तदुभयमिति व्यंग्यत्वभिन्नकाल एवेति भावः आदिरंत्येन सहेता आदिर्वर्णइति

स्यजननकप्रयत्नानुरूपकालपर्यंतस्थायी वृत्तित्रयेपि वर्णः स्वैकरूप एव अनुरणनं पूर्वसजातीयध्व
न्यंतरमेवेतिमतमाश्रित्याह यद्वत्ति मात्राकाल एवेति वर्णोभिव्यक्त्यनंतरं स्वसजातीयस्यैवानुवृत्तेः
तत्त्वनुत्पत्तावनुनिष्पादिध्वनिर्नव्यक्त्यंतरमभिव्यनक्ति प्रथमगृहीतेति वर्णोभिव्यक्त्युत्तरमुत्पद्य
मानोध्वनिर्व्यनक्ति पूर्ववर्णस्वजातीयं वर्णांतरं इदमेवस्फुटं तदुक्तं हरिणा वर्णस्य ग्रहणे हेतुः प्राकृतो
ध्वनिरिष्यते वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते इति शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदाय वैकृताः इति
च ग्रहणेतज्जत्वाख्यकत्वेन ग्रहणे प्राकृतः प्रथमोपन्नः वैकृतः विकाररूपो द्वितीयादिः वृत्तिभेदाय
पुनःपुनरुत्पत्त्याधिजनकाः वैकृता इत्यर्थः एवं च पुनःपुनरुत्पत्त्याधिजनकत्वेन वैकृतस्य वर्णांतर
जनकत्वं बाध्यं नित्याए वेति स्फोटरूपत्वादित्यर्थः कैयटेन ध्वनिनमिति · तस्मादुच्चारणे तेषां मात्रा

५७ त्वमयीतिसंज्ञास्वरूपबोधकालेस्वबोधोपिदुर्वारइत्याशंतयोरपिसंज्ञाप्राप्नोत्येवेति स्वमिस्तु हन्ति
र्थैथैतिपरास्तं यथार्थबोधकत्वसंकेतस्यदीपऽसत्वेनप्रकृतेसत्वेनस्वाग्राहकत्वादितिभावः यत्तु घि
शब्दसंकेतस्यघिशब्देपिगुणादर्शनेनसंज्ञास्वरूपस्यापिवृद्धबोध्यत्वदर्शनात्प्रादिसंज्ञा अपि स्वसंज्ञा
घटकेकारादिष्विव अकारचकारयोरपिप्राप्नोत्येवेति तन्नघिपदमिदुदंतबोधकमिति संज्ञासूत्रवा
क्यार्थकालेइकारांतत्वेनोपस्थितघिशब्देपिघिपदसंकेतसत्वेनसंज्ञास्वरूपेण स्वबोध्यत्वाभावात्
किंच अंसेहाद्दी आदिरंत्येनेत्यनयोरविशिष्टार्थत्वेनत्वव्ययहायगुरनिर्देशो वैयर्थ्यं दुरुद्धरमेव त
स्मादुरुनिर्देशोनोभयोपलक्षितस्यसंज्ञित्वबोधनात्वाघंतयोः संज्ञा किंच यं प्रति आदिः यं प्रति च अं
त्यइतिचभवन्तितस्यग्रहणंभवतीतिभाष्योक्तया प्रत्येकं स्वोत्तरवर्त्तिस्वपूर्वकवर्णराक्षेपकत्वबोधने

नवकुत्री हाविचाद्यंत घटितसमुदायानाक्षेपवोधनेनविशिष्टवोधकयदाभावेनचावयवरहितस्यैवसं
ज्ञित्वप्राप्तौस्वस्यचरूपस्येत्यस्यादिसंग्राह कत्वेनसार्थक्योपपत्तौफलितार्थस्यकथनेनुपयोगाच्चभव
न्मतेभाष्यमशुद्धमेवस्यात् यदपिकेवलांत्यपरामर्शाभावेपिविशिष्टसंज्ञारूपपरामर्शेसतिसमुदायेफ
लाभावादवयवयोःसंज्ञाप्राप्नोतीति तदपिन आद्यंतरहितस्यसंज्ञित्वे अकारे अचत्वस्याभावे अ
चृशब्देपरतोयणादिफलस्यत्वात्फलाभावोक्तेरसंगतत्वात् इतिवोस्तुभमनोरमेरमणीयेइतिदिकृ
स्वरूपमिति अंत्यसहित आदिःमध्यगान्बोधयतिस्वंरूपंचवोधयतीत्यर्थः शब्दाधिकाराद्वितीयां
तस्वमिति अप्रधानेतृतीयेति साहिसंवोच्चारणक्रियायामेवनतुप्रसाध्यनेइतिभावः अंत्येनोपलक्षि
तस्यसंज्ञात्वेफलमाह तेनेति प्रत्याहारेष्विति अत्रशोधः वर्णसमाम्नायोपदिष्टानामणत्वादुपदिष्ट

५४ त्वबोधकलिंगाभावादस्य चावित्सादावणुदित्सूत्राप्रास्याप्तिलिंगेनतत्तत्स्थलत्वबुधप्रत्याहाराद्यवर्णेषुसू
त्रचरितार्थमितिसूत्रप्रयोजनप्रदर्शकभाष्यस्याद्यवर्णस्यसंज्ञात्वेएवसंगतिः विशिष्टस्यसंज्ञा
त्वेहियुभादिएकदेशवर्णवदणादिपदैकदेशवर्णोनामप्यनर्थकत्वात्तद्ग्राहकत्वाप्रसक्तिरिति
सूत्रावकाशप्रदर्शनेविरुद्धमेतेतिभावः एतेनतद्भाष्यमणुदित्सूत्रप्रत्याख्यादीर्घादिनिरूपितावाचक
ताआद्यवर्णएवविश्रांतातस्याचरितत्वात्तनमध्यमेष्विरेवंपरंनत्विकारोकारादिनिरूपितापिसा
आद्यवर्णइत्येतत्परं तस्मात्सहग्रहणात्समुदायस्यैवसंज्ञात्वमित्यपास्तं नन्वेवंशिष्टाद्वृत्सुस
त्तिर्नस्यादित्यतआह सहग्रहणात्स्विति तत्तीयातुर्वृद्धोमूनेतिवमर्थ्यसज्ञावेनापिसिद्धेतिनदुत्वा
रत्वमेतदर्थमिवेतिभावः प्रत्याहारपदवाच्यताप्यंत्यवर्णोपलक्षितेआद्यवर्णएवतेनप्रत्याहा

रणं स्ववाच्यवाच्ये निरूढलक्षणेत्यादि व्यवहारः संगच्छते अन्यथा प्रत्याहारपदस्य विशिष्टशक्तत्वे स्व
पदेनापि तस्यैव परामर्शः स्यात् न हि तद्वाच्यत्वमकारादिषु किन्त्वादिवर्णवाच्यत्वं न हि स स्वपदेन परामृ
ष्टः शक्यः सर्वनाम्ना प्रक्रान्तपूर्वपरामर्शित्वादित्यसंगतिः स्पष्टैव किं चेति तथा चैकः काशोऽइत्यादिनि
र्देशानुपपत्तिरिति भावः केवल एवेति यण् शब्देन विधावप्रतीतिशेषः न त्विति वस्योपलक्षणत्वा
दिति भावः विशिष्टे संज्ञात्वमिति कैयटादिमताभिनिरासायाह अत्रेदमिति प्रत्याहारेष्विति लिंगे
नाद्यस्य संज्ञात्वमिष्यत्वादित्यर्थः लिंगाभावादर्थप्रत्याविसादौ सूत्राप्रवृत्तिरेव तात्पर्यग्राहकमिति
आदिर्निष्ठता वर्णो बोधकत्वाद्बोधक इत्यर्थः ननु वाचकावाचकसमुदायस्यार्थवत्त्वाभावात्प्राति
पदिकत्वाभावात्कथं विशिष्टाद्विभक्त्युत्पत्तिरत आह सहग्रहणादिति स्वार्थिकप्रत्ययस्यागमवदन

५१ र्थकत्वेनसमुदायस्यानर्थकत्वेपियावादिभ्यइतिशास्त्रप्राप्ताल्पास्त्रकृतिगतार्थवत्वस्यारोपवत् अंस
स्याप्रत्ययकत्वेपि अंसविशिष्टे अर्थवत्वारोपबोधकसहग्रहणादित्यर्थः घोतकांतरेति प्राग्धुपलक्षिते
विशिष्टेवाशक्तिबोधकाभावादित्यर्थः इत्संज्ञयापहृतस्येति अनुबंधेष्वित्संज्ञायाः फलनष्टयवत्वस्य
सतिसंनवेति यनत्वेनेत्संज्ञयाप्रत्याहारलोपसंपादनादित्यर्थः क्वचिल्लोपमात्रफलापीत्संज्ञेतित्वम
त् लोपश्चेत्संज्ञासमकालएव· अतएवप्रत्याहारेष्वनुबंधाग्रहेलोपश्चवत्वनवकाशरइतिहेतुः संगच्छते
चिकीर्षितप्रत्याहारसंबंधमनुबंधविषयएवलोपेनापहारइत्यत्रबाधकमाह अन्यथेति अत्रप्रत्या
हारनिष्पत्तिकालेणकारादीनांलोपाभावेणादिषुचूलंदुर्वारमित्यर्थः किंचेत्यादि अंसादिविशिष्टसं
घस्ययणादिसंज्ञाः इत्यर्थः तथाचयणशब्देनयकारणकारणकारयोरुभयोरप्युपस्थितत्वादेक

स्यागेमानाभावेन संज्ञात्वरूपेणोभयोर्विधानसंभवेन यण्शब्द आदेशो युक्त आपादयितुमिति भावः
इकू शब्दस्येवेति॰ इगिति समुदायस्य कः काशङ्कास्तत्रस्यानिवसंभवेन व्याख्यानान्निर्णयसंभवेन व
र्णोनाम्स्यानित्वासंभवदिति नास्मन्महितवर्णानामनादिसंज्ञाः किंतु तदृहितानामेवेति भावः हरस्त्वदिति
अंतस्यग्रहणसामर्थ्यादेवमिल्वात्स्यैनेतामसाहारइत्येतदभिप्रायः मध्यमेनेतेति रप्रत्याहारे अकारादि
ग्रहणापत्तिर्दोषः इत्यर्थः तथा चकृत्सधितिस्यादेो अणइत्यस्यादेशः स्यादिति भावः मध्यमइति इ
गादिप्रत्याहारे अकारग्रहणापत्तिरित्यर्थः तथा चज्ञानेइत्यादावपि कोपीति नुमापत्तिरिति भावः उभ
योपादानेतु यस्मात्पूर्वो नास्ति परस्मिन् सति इत्स आदिर्यस्मात्पूर्वं सत्वे परो नसोन्त्यइति लोकसिद्ध
लक्षणसत्वादनयोर्मध्यवर्त्तिकिंचिदस्तीति प्रतीतेः परिछिन्नसमुदायस्यैव संज्ञा अकाराकारादीनां

50 यहणेतुरकारेकाराद्दीनामादित्वं सत्वयोरभावापत्तिरितितेषांन ग्रहणमितिबोध्यं इदंच सूत्रमनिसं
ज्ञासइह्रस्वदि॰ तिसूत्रेअत्र्॰ हलोर्द्धकार्यहलात् अन्यथाप्रत्याहारसत्वाद्उन्दोहलादाविसर्यत्वादत्वीसे
वक्सिद्धोक्किसुभयो पाणिनिनन च व्यक्ति शास्त्रेइसैकारेऽति प्रसंगः आटः पित्वेनङित्वाभावात् आटास
हैकादेशस्य स्थानिवत्वाच्चतेनैं नक्तोरापधयोरितिसत्रनरम प्रत्याहारइतिबोध्यं नवीनास्त्विति प
क्षिप्तादीधातोरुत्तत्वि आङ्गसहगुणेपररूपेएत्यधतीति हृद्धेरप्राप्तिरित्यर्थः प्रत्याहार ग्रहणेच
ह्लतायाभाष्यानुक्तत्वेपिस्वीकारवदेतेसूजादिस्वीकारेभाष्य विरोधोऽकिंचिरएवगुरुभूतसूत्रा
वृत्तिस्वीकर्तृभिरनुक्तत्वमात्रेणानभिधानस्यवकुमयोग्यत्वात् अंतस्थाहत्तयेद्दति यदेतुइकः
एचइलः नासिकैसादिनिर्देशोः प्रत्याहारानुपूर्वीवाधकसूत्रोत्सवर्णानामग्रहणंबोध्यते नहाव्य

थमिवेदमितिदृष्टिस्तत्रस्य कैयटबोधितः एतत्सक्षस्वरसः इति दिक् अत्रसः शोधः पूर्वयत्रे येनविधिस्त
दंतस्य नदंतस्येति तदद् अंतो यस्येतिवहुव्रीहिः कर्मणीति यद्यपिभावे प्रत्ययेपिविधेयं कर्मप्रसिद्धत
यालभ्यते तथापिनाकांक्षप्रयोगस्यौचित्यात्कर्मणीत्युक्तमिति बोध्यं कर्त्रर्थीति कर्त्तृव्यापारस्येयो
ज्यव्यापारवत्तएव करणत्वादित्यर्थः पारतंत्र्यमिति प्रकृत्यर्थस्तत्राधेयतयान्वेति तस्य चनिरूपक
त्वेनान्वयः एवंच यद्वृत्ति पारतंत्र्यनिरूपकं विधेयं तद्वृत्तिलभ्यते तत्र शब्दशास्त्रे प्रायः शब्दस्यैव संभ
वतीति यच्छब्देन शब्दो विवक्षितः स आत्मा तस्य संज्ञेत्यर्थः अन्येतु यत्नेनेति करणत्वतीया करणेन
चान्यस्य विधिर्भवतीति भाष्यादनेषां व्यापारवत्त्वाभावबोधनाद्विशेषणमेव करणत्वतीयांतेनो
च्यते विशेषणस्यैवेतरव्यावृत्तिकरणमेव व्यापारः यथा एरजित्यत्रैव णीत्ति भिन्नधात्वनुसंबंधप

51

रतारहूपः एवेति विशेषणं वृत्तिर्व्यापारः तत्र प्रत्यासत्त्या शब्दप्रयोगोपस्थिते विषयं विशेषणमेवत
द्दंतत्याहकं क्वचित्तु सत्तिगमके शब्दप्रयोगोपस्थिते सविषयोपि विशेषणं शब्दरूपविशेष्यमात्रायापि
तद्दंतत्याहकं तदन्यंतरंगत्वात्समानाधिकरणं विशेषणमेव न व्यधिकरणमित्याह निर्मलत्वइति
शक्तिग्राहकस्यापि गुणिलिंगायित्वेति कोशस्य लाघवाल्लक्षणबोधकत्वव्याख्यानानुशासनस्यापिल
क्षणग्राहकत्वेन सार्थकं सुप्तिङ्विभक्तौ न लक्षणेत्यत्र मूलाभावइत्यर्थः तदेव स्पष्टयति दोषांतराय नचे
ति तुल्यत्वादिति लक्षणायै वापपत्तौ कालांतरविधायकानां प्रहासे चेत्यादिपुरुषव्यत्ययविधायकानां
च वैयर्थ्यापत्तेरित्यर्थः व्यत्ययानुशासनान्न लक्षणा सुप्तिङ्विभक्तावितिवदतः क्रियावाचको धातुरि
तिबोधकभ्वादिसूत्रसत्त्वेपि तिङो व्यापारे लक्षणेति वदतो महाभाष्यिकसंज्ञादुर्वारेति परिहसति

रथोगच्छतीत्यादाविति आदिना ज्ञानाश्रितसाध्यावाश्रयत्वेलक्षणेति संग्रहः अत एव सुब्विभक्तौलक्षणा
सत्वादेव प्रयाजशेषेणेति घृ क्षरणदीप्त्योरिति धातोः क्षिप्रक्षारणार्थकाभिघारयतेरर्थनिरूपितकर्म
त्वस्य तद्विशिष्टसंभवात् द्रव्यरूपत्वात् प्रयाजशेषस्य कर्मत्वसंभवात्करणत्वानुपपत्तेश्च द्वितीयायाः
अधिकरणे तृतीयायाः कर्मत्वे लक्षणेति तेषामभावः किंतु चैविक्षिकं इति तस्यार्थं तत्रांशद्वयानां विशे
षणत्वेन सर्वत्र लक्षणमाह तेनेति फलितमिति येन करणेन विशेषणेन विशिष्टस्य विशेष्यस्य कार्यं
विधीयते तद्विशेषणं स्वांतस्य विशेष्यस्य संज्ञेति वाक्यार्थः संपन्न इत्यर्थः अत्रायं सिद्धांतः एतस्य
वृत्तौ विशेषणे समानाधिकरणत्वयोग्यताज्ञानं निमित्तं तेनेन हन्मि सत्रे नंगमेत्यन्वयाभावेपि त
दंत विच्छिरिनिशेवाधधियोवोधप्रतिवेधकत्वादित्येके अन्ये तु समानाधिकरणविशेषणत्वज्ञान

52 मेवैतत्प्रवृत्तौ लिंगं इन्हन्निस्य तु बाधज्ञानस्य बाधे प्रतिबंधकत्वाभावादिनं गमितिबोधो भवति
परं तु बाधज्ञाने न जातबोधे ऽप्रामाण्यग्रहात्सन्नक्ष्यसंस्कारकः एवं चेन्नं शे वा धात्वस्य चे संशं स्या
पीनं शेः प्रवृत्तिरित्याहुः न कथंचिदिति शब्दस्वरूपं विशेष्यं तु सर्वत्र सत्वान्नैतत्प्रवृत्तसुपयोगीतित्वि
क्वापणिस्वत्र तदंतविधिशंका समानपरभाष्यादवसीयते क्वचित्तु वार्तिकभाष्यादिगमकसत्वे सर्वा
द्यानी स्यादेतदप्येतत्प्रवृत्तसुपयोति स्वीकार्यमिति बोध्यं धातोरेवेति धातुविशेषणत्वस्य पूर्वसूत्रेक्
प्तत्वादर्थाधिकाराद्वदंत धातुपरमेवानुवर्ततइति तद्विशेषणमेवो श्चपूर्वस्येति उचितमित्यर्थः अ
तिव्याप्तिरिति अयमर्थः ओष्ठः पूर्वो यस्मादिसर्थे तदनारंभकपंचम्यंतपदवाच्यत्वरूपावधित्वस्य
तदारंभकत्वे सति पूर्वत्वरूपपूर्वावयवत्वस्यैवं प्रसेकस्य न संभवतीति आष्ठपूर्वस्य ऋदंतस्य धा

न्नोरित्यर्थकसूत्रस्य संकीर्णमित्यत्र प्राप्तिरितिदोषः केचित्तु नन्दं तत्वं ओष्ठ्य पूर्वत्वं च द्व्यमपि
धातोर्विशेषणं मे कत्र द्व्यमिति रीत्या सम्भिन्नस्यापि तत्राप्तिरित्याहुः यद्यप्योष्ठ्यः पूर्वो यस्येति बहुव्री
हौ पूर्वशब्दस्य प्रथमावयववाचित्वाद्धात्ववयवत्वमोष्ठ्यस्य सुलभमिति संकीर्णमित्यत्र न दोषस्त
थापि वर्णस्य वर्णान्तरावयवत्वाभावादारोपितत्वं तमानाभावाद्दिग्वाचकत्वेन पूर्वादीनां प्रसिद्धत्वा
द्वाधिसाकांक्षत्वाच्च पंचम्यर्थे बहुव्रीहिर्वोचित इति भावः दिग्देशकालवृत्तीनां पूर्वादिशब्दा
नां पूर्वादिशब्दो नामवयवे पुनःस्थत्वात्फो णी हृत्तिरिति निष्कर्षः गौणस्यापि मुख्यसमवायत्वे मेव
प्रचुरप्रयोगास्य पञ्चम्यर्थे बहुव्रीहिरिति धात्ववयवौष्ठ्यपूर्वत्वाभावान्न संकीर्णमित्यत्र दोष इति चेत् धा
तोः प्रथमावयवौष्ठ्याभावात्सुस्पर्षत्नीस्यत्रोत्वं न स्यादिति दोषः बोध्यः एवमिति अंगस्य प्राकर

53 लिङ्कत्वादंगं विशेष्यं अतः प्रत्ययो वा विशेष्यमिति पक्षद्वयं यद्यप्युकारोपि श्रुतस्तथापि तस्य प्रत्यय
विशेषणत्वस्य युक्तत्वेन न तन्निर्देशो घटत इति भावेनाह नन्विति अश्नुहीति उकारान्तप्रत्ययस्यासं
योगपूर्वकत्वाद्धेर्लोपः उकारान्तप्रत्ययस्य विशेषणे असंयोगपूर्वादिति भावः इदमत्राकूतं उकाररूप
विशेषणविशिष्टे ऽसंयोगपूर्वत्व वैशिष्ट्यमिति रीत्या बोधने वाच्ये तः पूर्वोपस्थितत्वात् परस्य विशेषणसंबं
धस्यासंयोगपूर्वादित्यपेक्षयाऽन्तरंगत्वादिति शक्नुहीति पाठः अश्नुहीति पाठे उपदेशत्वं तदिति सूत्रे आ
श्रीयत इति प्रयोगासरस्मेयदं अनुदात्तेत्वलक्षणस्य तङो ऽनित्यत्वाद्वा विशेषणे चेति चो भिन्नक्रमो ऽध्या
हृपि स्तुतरं बोध्यं तेन अंगस्यासंयोगपूर्वत्वादश्नुहीत्यत्रातिव्याप्तिरपि बोध्या गुणाभावास्फुरणा
दिति विशेषणविशेष्यभावज्ञानसापेक्षतया तदन्तविधेरवान्तरवावरार्थबोधोत्तरमेव प्रवृत्तसा

वहिरंगत्वात्सूर्वस्मुकारस्यैवासंयोगपूर्वादित्ति विशेषणमिति भावः तमनुभूय विशेषणसंबंधमनुभू
य विशिष्टासंज्ञा असंयोगपूर्वोकाररूपा ननून इत्यस्य तदंतसंज्ञात्वे पुकारस्यासंयोगपूर्वादिति वि
शेषणमस्तु को विरोध इति चेत् न उत्तरस्य स्यतदंतसंज्ञात्वे संज्ञिप्रत्यायने विशेषणत्वमापन्नस्य
स्वविशेषणानुभवे अयोग्यत्वात् स्वस्य विशेषणान्वये इतरविशेषणत्वेनोपस्थितेस्तंत्रत्वात्
अन्यथा ऋद्धस्य राजमातंग इत्यपि स्यात् तत्रैकार्थीभाववदत्राप्युकारविशेषणकोपस्थितिसत्वा
त् गुणानां च परार्थत्वादिति न्यायात् यथैकदेशत्वाच्चेति रहस्यं गृह्यमाणेति सूत्रेउद्योतमार्गेणेत्यर्थः
वाक्यकि तदंतोपाधिप्रसंग इति पाठे भावप्रधानो निर्देशो वोध्यः ननु विशेषणविशेष्यभावस्य यथेष्ट
त्वे समासप्रत्ययादीनां वैयर्थ्यं चक्रीदृशाः सद इति विशेषानिर्णयश्चेत्तत आह स्फुटीकर्तुमिति सुवि

54 ति सुपेत्यर्थः सुबंतैः श्रितादिभिरित्यर्थः कल्पित इति वार्त्तिकेनैव न तादृशविशेषविशेष्यभाववोधनात्क
ल्पित इत्यर्थः एतेन प्रत्ययविधौ निषेधेन व्याख्यातं क्रोडीकृतं समानविषयकत्वस्य प्रत्ययविधिवि
षयत्वस्य-दिव उत्सूत्रे इति इदं यस्मिन् तत्रेत्यर्थः आद्यचानद्धुरितपादेऽ इंद्रे चेति सूत्रे इत्यर्थः पूर्वादिनिः
सपूर्वाच्चेत्यस्य परिभाष्य ध्येपि ज्ञापकमित्येतस्या अप्युक्तमात्रे एतेन व्यपदेशिवद्भावो प्रातिपदिकस्य स्या
इंद्रे चेत्सूत्रे के परे नो केरस्या अनुक्रेरिंदं विंसमित्यपास्तं अतएव ग्रहणवतेत्यस्य प्रत्ययविधिविषयत्वा
देव व्याख्यानं ह्रस्वविधायकस्य पक्षा सूत्रे इत्युत्तरं कृतमिति शेषो वोध्यः प्रत्युक्ता इति अतिसखे
रित्यत्रासखीति न निषेधो ग्रहणवतेति तदंतविधिनिषेधादिति वदन्नैकैपरः आदिग्राह्यः सुबंतमे
वेनेति सुबंतस्य विसर्गांतत्वेन श्रितशब्दांतत्वन्नेत्यर्थः संबुध्यंतमिति टावंतमपि वोध्यं वाधित

मिति सुबंतत्वे विशिष्टस्य श्रितशब्दत्वाभावादित्यर्थः बाधादिति रवट्वेति शब्दस्य द्वितीयांतरूपत्वस्ये
त्यर्थः यत्तु सुपेति तृतीयांतत्वेन सुब्विशिष्टैः श्रितादिभिरित्यर्थे न दोष इति वृहद्विवरणकाराः सिद्धांता
शयं वर्णयंति तेषामयं भावः सुपेति तृतीयांतस्याधिकारत्वस्वरूपलक्षणत्वयोः सर्वसंमतत्वेनैसाहित्ये
तृतीययासुप्सहित श्रितादिभिर्द्वितीयांतं समस्यत इत्यर्थे हि कष्टं परमश्रितइत्यत्रापि समासः प्राप्नो
ति अन्ये तु पूर्वपक्षाशयस्तु सुबंतैरित्यर्थकं सुपेत्यनुवृत्तं विशेष्यं तद्विशेषणं श्रितादयः अंतशब्दो
ऽवसानवाची सुबवसानकाः केऽदृस्याकांक्षायां श्रितादीनि प्रातिपदिकानि संबध्यंते तेषां च सुबंत
रूपत्वाभावेपि सुबवसानकत्वमक्षतमेव एवं च तदंतविधौ परमश्रितइत्यत्रापि प्राप्नोति उत्तराश
यस्तु तादृशविशेषणे वैशिष्ट्यं तद्रूपत्वाभावेपि संभवति नहि सर्वो चयवनीले एव नीलो गौ रिति एव

55 ध्विंउश्चैवस्य सत्वेपि नीलत्वइति प्रतीतेरित्याहुः परंत्विदं चिंसं विवरणमते सुपेस्यस्य प्रत्ययग्रहणप
रिभाषया सुबंतेनेत्यर्थात् सुप्सहितेन रिसर्थोयपत्तिश्चिंत्या लक्षणयां तु घट्कुड्यां प्रभातं यत्तु पू
र्वकाले केयत्र सुबिति प्रथमांततया तथार्थासंभवइति तन्न सुप्सहितानां पूर्वादयइत्यर्थसंभव
न प्रथमांतसुबिससंबंधइति वक्तुं शक्यत्वात् यदपिस्यानविनाविवरलासमर्थपरिभाषायाः स्थि
तसमर्थपदार्थप्रतिविशेषणतया प्राप्ततदंतविधेर्निषेधार्थमिति यत्तु कृतं तदपिचिंत्यं सुपस्सा
सत्वेन तद्विशेषणत्वेनैव समर्थामिन्यस्य वाच्यतयाश्रितांतसुबंताभावेन परमश्रितः इत्सत्रा
तिव्याप्तिपरभाष्यस्यासंभवदुक्तिकत्वापत्तेः तस्मादयमत्रभाष्यकैयटाशयः सुपेसनुहत्तौप्र
त्ययग्रहणपरिभाषया यस्मात्प्रत्ययविधिस्तदादीसुपएस्थितं तत्र प्रत्ययेनोपस्थितं तत्समानति

भक्तिकं अत एवैद्‌ हस्वादिसत्रेद्वं ताद्दिस्यर्थेलाभः श्रितादयश्च तद्विशेषणानि एवं च श्रितादिभिः
प्रत्ययविधानावधिभूतैः प्रत्ययावसानकैः समासइत्यर्थे कृत्स्नश्रितः इति सिध्यति प्रकृतिविशेषण
श्रितादेस्तदन्तविधौ श्रितादन्तैरित्यर्थे कृत्स्नं परम श्रितः इत्यत्रातिव्याप्तिः सुबन्तविशेषणं श्रिताद
यइत्समभिप्रेत्य कैयटव्याख्यातृणां परं तु कैयटमते भाष्यस्य सर्वपक्षस्यैवनिर्दिष्टत्वापत्त्या कैयट
स्य एवेति प्राहुः प्रत्ययविधावपि नड्याद्यन्तप्रत्ययविधानावधिभूतसुवसानकेभ्यः प्रत्ययइत्यर्थे
सोत्रनड्यादिरित्यत्रातिप्रसंगः प्रत्ययविधानावधिभूतनड्यादिभ्यः सुववसानकेभ्यः प्रत्ययइत्यर्थे
तु नातिप्रसंगइति नव्यपितत्प्रकृतिकेलक्षणम् अतएव कैयटे लक्षणानुपपत्त्या सइत्यास्माकीनः
सिद्धान्तः प्रकृतमनुसरामः एकविभक्त्या विस्यादीति परिनिष्ठितविभक्त्या समासइति पक्षेइतिशे

56 षः ज्ञापकत्वेनेति खट्वाक्षिपइति ज्ञापकत्वेनेत्यर्थः नहि खट्वा इति शब्दरूपं द्वितीयांतमिति भावः
द्वीपायीति· यत्तु न च शब्दत्वज्ञावाच्छुनुरनुमइत्येव सिद्धे वार्त्तिकं व्यर्थमिति वाच्यं प्रत्ययग्रहणप
रिभाषया शब्दं तस्य यत्कार्यं तदेवातिदिश्यते ननु ततः पूर्वस्य वेति सिद्धांतात् एतद्वार्त्तिकस्यैवात्र मा
नत्वं किंच एष जगतोः शब्दस्वरो माभूदिति नियमार्थं चावश्यकं वार्त्तिकमिति तन्न वार्त्तिके उपमेये
षष्ठ्यदर्शनेन षष्ठ्यंतादित्ती कल्पने मानाभावेन भवदुक्तसिद्धांतस्य खपुष्पायमाणत्वात् किंच भव
दुक्तेर्थे महती तरत्यत्रापि तद्धितेति ह्रस्वविकल्पानापत्तिः तस्मात्तृतीयांतादेव वतिः न च शब्दव
ज्ञावेन स्वरसिद्धे बृहन्महतोरिति व्यर्थमिति वाच्यं नियमार्थमिति भवतैवोक्तत्वात् तस्मान्महतेइत्या
द्यावुदात्तस्यैव महती अतिमहती सात्रावपि शब्दग्रहणेनैव सिद्धत्वान्नियमार्थं वार्त्तिकस्यावश्यक

त्वात् अती महतीस्य च प्रत्यय ग्रहण परिभाषया शात्स्वराश्रभावपि हृहन्महतीरित्यस्य प्रत्यासत्या
तस्य कृत्तिक प्रत्ययेएन ग्रहस्याऽप्राप्तप्राप एणार्थत्वाभावाच्च गौरादित्वं मनयोः प्रामादिकमेवेतितास्य
र्थं यदितु वार्त्तिक सामर्थ्यादेव वर्त्तमाने पृषदिति सूत्रे षष्ठ्यंतताद्वृत्तिरिति कल्प्यते तेन नस्वर प्राप्तिर्महती
तरेति हृस्वविकल्पे चनमानमिसुच्यते नराप्यि वार्त्तिके स्वनङीयगुदात्तत्वे सिद्धे गौरादित्वं प्रामादिकमे
वेतिप्राहुः अग्रहत्तेरिति स्वंरूपमिसेतन्मूल कल्वाद्धिशिष्टरूपोपादान एव तस्य वृत्तिः औङः स्यामिति
चात्र मानमिति भावः तेन विशिष्टग्रहलेऽर्थवद्ग्रहणेन अनर्थकस्याग्रहणादिति द्योतकेत्वपक्षे
द्योत्यार्थेनार्थवत्वादुपसर्गस्येव ग्रहणं नान्यस्येति भावः महदुत्तर पदत्वाभावादिति नच विशि
ष्ट समासस्य महद्रूपचरमावयवत्वान्नदोषइति वाच्यं तदुत्तर पदस्येति समासप्रत्यासत्या महदु

57 न्तरमध्यक समासस्य रूपांगस्य दीर्घ इत्यर्थे विशिष्टेन समासस्य महदुत्तरपदकत्वाभावात्र यस्य चा
वांतरसमासस्य महदुत्तरपदकत्वं तस्य चांगत्वाभावादिति भावात् इत्युक्तत्वादिति धर्मिग्राहक
मानेन तथैवत्वाभावादित्यर्थः व्याख्यातइति वार्त्तिकमतेन स्यात् अजरसिति भावः वार्त्तिकमते वक्तुं चैव
हृजरसइति न सिध्यति इत्यपि बोध्यं वैविषीध्यमिति विष्णु व्याप्तोस्त्वरितेतत् फलितोर्थ इति इदंतु
चिंत्यं जात्याख्यतमाक्षेपस्तस्याः विशेष्यत्वं यद्यपि दृष्टं तथाप्यनुपात्तविषये आक्षेपोपात्तसं
त्तिसेद्धिसत्वात्त्वकथमाक्षेपः किंच योगरूढं पंकजादिपदवत्सर्वनामपदस्यापि सत्वेन द्वयोर
र्थयोरभेद एव प्रतीयते नतु तयोः परस्परमुद्देश्यविधेयभावेनान्वय इति कथं विशेष्यत यान्तरं त
विधिरिति किंच संज्ञोपसर्जनप्रतिषेधारंभेणान्वयर्थत्वं न वार्त्तिककारसंमतं तस्माद्व्यावर्त्तक

मपि शब्दरूपं विशेष्यमेतद्वार्त्तिकभाष्यादिमूलकव्याख्यानादादायतदंतविधिरत्रबोध्यः ङीप्
प्रतिषेधे इति ननु प्रतिषेधस्य विधित्वाभावात्कथं सूत्रेण तदंतत्वविधौरेचेन्न विधीयत इति विधि
रिति कर्मणि क्तिप्रत्ययेन विधीयमानस्य ग्रहणात्प्रतिषेधस्यापि विधीयमानत्वेन प्रतिषेधेऽपि तदं
तविधेः सुलभत्वात् एतद्वार्त्तिकमपि ग्रहणवतेत्यस्य व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यस्य च
प्रत्ययविधिविषयत्वमानं बोध्यं इति सूत्रेणेति· प्रत्ययविधौ पंचम्याः युक्तत्वेपि प्रथमानिर्देशः
सर्वोचस्या युक्तस्य तस्य प्रत्ययविध्यर्थं प्रथमानिर्देशः तेन केवलात्तदंताच्च प्रत्यय इत्याहुः शोली
शब्दः प्रत्ययमुत्पादयतीत्यध्याहारावश्यकत्वेन शब्दरूपं विशेष्यमादायतदंतविधिरिति प्राहुः न
प्रातिपदिकमिति स्त्रीप्रत्ययांतत्वादित्यर्थः यथाकथंचिदिति परिभाषाप्रयोजनकथनावसरे

58 भाष्ये त्रिस्यादिति विस्पष्टोक्तत्वादित्यर्थः सावकाशत्वादिति अंतग्रहणं नियमार्थं सूत्रांतादेवेत्यर्थ इति
भावः चरितार्था स्यादिति तदंतविधिभावेन तदंतेत्र वृत्तिसंपादनेनेत्यर्थः चरितार्थत्वादिति तदं
तेऽप्राप्तप्रापणार्थत्वान्नियमार्थत्वासंभवात्केवले व्यपदेशिवद्भावेन प्रवृत्तेर्दुर्वारत्वाद्व्यपदेशिव
द्भावोऽप्रातिपदिकेनेति परिभाषाज्ञापकत्वासंभवादिति भावः ननु तर्हि केवलसूत्रशब्दात् टग
नुपपत्त्यर्थं पूर्वोक्तपरिभाषा स्वीकार्येति चेन्मानांतरसिद्धत्वाना पूर्वत्वादाह ज्ञापकसिद्धेति ज्ञापक इति
सपूर्वपूर्वोदिति एकसूत्रेणैव व्यपदेशिवद्भावात् केवलेपि सिद्धे योगविभागोऽस्यार्थ इति ज्ञापक इति
भावः सामर्थ्यमपीति अपिनाऽरुचिः सूचिता विशेषणविशेष्यभावकमसमासबोधकभाष्यवार्त्ति
काद्यसत्वेपि तत्कल्पनेऽतिप्रसंगादुणिद्धर्णीसस्य वैयर्थ्याच्च प्रवृत्तेव्यस्यासाभावबोधकस्य स

मास्येति निषेधस्य सत्त्वाच्च तदंते प्रवृत्तस्यार्थमंतग्रहणमिति सामर्थ्याद्दुरूपयादमिति व्यर्थमिति केवले
ऽप्रवृत्तिरनभिधानादिति तात्पर्यं वस्तुतस्तु परमदिक्साद्रिभ्य इव केवले ऽप्रवृत्तिवोधकभाष्याय भावा
त्तस्य पूर्वादित्तिज्ञापकसिद्धत्वाच्चानभिधानाश्रयणापेक्षया परिभाषाश्रयणमेव वरमिति वोध्यं
अत्रेदं वोध्यं पूर्वात्स्य पूर्वादित्तिसविभक्तिकसमेकं सूत्रं कार्यमिति योगविभागो ज्ञापकः अत एव कृत्स्नादि
भाष्ये स्वरस्त पूर्वादिभ्येनन्मा च्चानुवृत्त्याऽनिष्टीति प्रयोगसिद्धिः एवं च रात्री स्यादौ केवलस्याप्राप्तेस्तस्य
चरितं वक्तव्यं ननु तदंतविधिविषये तस्य चेत्यनेन केवलादपि चेत्त्व्यपदेशिवद्भावोऽप्राप्ति पदर्शिकेनेति व्य
र्थमिति चेन्न ज्ञापकस्य सजातीयापेक्षत्वेन यत्र सूत्रे एव विशेष्यं रूपमुपात्तं तत्रैव परिभाषाविषयत्वात्
यथाऽस्याऽधिकाः अस्मिन् शते इत्यत्र डो न भवति अत एव केवलपूर्वादिस्मन्नकेवलैकशब्दे प्रवृत्तिः

59 अत एव पूर्वादिसे च तदंतविधिनासिद्धे सपूर्वादित्यस्य ग्रहणं वर्तेति परिभाषाज्ञापकत्वमुक्तं चैवं परे
न ग्रहणवते — सपिसस्य यविधौ निषेधस्यैवानुवादकं लाघवात् इति दिक् ननु तस्यैव सु प्रमाने
गोरूपप्रातिपदिकस्यापि व्यपदेशिवद्भावेन तदंतत्वात् तस्य ग्रहणात् ह्रस्वो दुर्वारः इत्याशयेन शंक
ते नचैवमिति विधानादिति अयं भावः उपसर्जनसंज्ञाया अन्वर्थत्वात् स्वार्थाभिधाने विशेषणत्व
स्याव्यावर्तकत्वादन्यार्थनिरूपितस्यैव ग्राह्यत्वात् प्रातिपदिकस्य तत्समानुवृत्ते श्चोपसर्जनत्वनिरूप
कस्य प्रातिपदिकस्यैव ग्रहणं एवं चेगांतनिष्ठस्य गोशब्दनिष्ठस्य चोपसर्जनत्वस्य निरूपकस्य प्रा
तिपदिकस्य विधीयमानो ह्रस्वो गोकुलमित्यादौ न प्राप्नोति न हि स्वनिष्ठोपसर्जनत्वनिरूपकत्वं स
स्य चित्रगुरित्यादौ तु विशिष्टनिष्ठ। त्वान्निरूपकत्वस्य न दोषः स्तत् ध्वनयन्नाह संनिधानाच्चेति नहि

स्वइति समासत्वेन प्रातिपदिकत्वाल्लिंगविशिष्टपरिभाषया वा प्राप्तिर्बोध्या अनुपसर्जनस्त्रीप्रत्ययेन त
दादिनियमाभावात्स्त्रीप्रत्ययांतत्वं अत एवातिराजकुमारीति सिद्धं द्विवउत्सूत्रे इति तद्धितपादे द्वंद्वे
चेति सूत्रे इत्यर्थः उभयोरेकज्ञाप्यत्वान्नोभयोरुक्तिः कैयट इति न शंक्यं द्विगिति इदंशौ द्योति द्विगार्थः स
मृएवेति भाष्ये: उभयत्रापीति ननु यद्विधाविस्तुक्तौ एग्विधौ कथं तदंतविधिरिष्ट इति चेत् अत्रोच्यते हलसी
राट्ठक्सर्थे शैषिके ठकि वहतीत्यर्थे पिठकः सिद्धत्वाद्धलसीरादिवहस्यधिकारे पुनर्हलग्रहणं तदंतवि
ध्यर्थं तच्चानर्थकं तस्येदमिति सिद्धत्वात्फलुगभावार्थं हलग्रहणमिति भाष्ये सिद्धांतितं शैषिके ठकि तदं
तविध्यभावे पारमहलिकः द्वैहलिक इत्यस्यासिद्धिः हलग्रहणसार्थक्ये भाष्योक्तमसंगतमेव स्यादिति
शैषिके ठग्विधावपि तदंतविधेरिष्टत्वात् इदंत्वं वा द्रष्टव्यं कारकबोधार्थं तु न हलग्रहणं

अर्थसामान्यात्सिद्धमिति वदता भाष्यकारेण विशेषप्रकारकबोधस्यानिष्टत्वाबोधनात् सर्वनाम्नां तु
द्विस्य सामान्यविशेषधर्मप्रकारकबोधजनकत्वाद्विशेषप्रकारकबोधस्योपपादयितुं शक्यत्वाच्च ए
वं च शकटहलसीराशेऽपि तदन्तविधिः परं तु संख्यापूर्वपद एव तत्रैव लुक्ः प्राप्तेरत एव परमहलश
ब्दात् ठक् कृतेति कैयटेनोक्तं अपरस्यादीयतीसूत्रस्य एतदर्थे लुगभावार्थं भाष्येऽपीति तद्वहतीति सूत्रे र
थहलयोरिति केचित्तु शेषिकप्रकरणे न रथाद्यत् । गवोद्धोरिति पाठेन सिद्धे तद्वहतीत्यत्र रथग्रहणं
रथांशे तदन्तविधौ ज्ञापकं द्विगोर्लुंगिसत्राचीति न संबध्यते द्विरथ्य इति भाष्योदाहरणात् अनभि
धानाच्च नातिप्रसंगः वहत्यर्थे तु अप्राग्दीव्यतीयत्वान्न लुक् तेन द्विरथ्य इत्येव रूपं सीताहलयोस्तु वा
चनिक एव तदन्तविधिः वहत्यधिकारस्य हलसीरादिति हलग्रहणं तु इदं शब्देन बोध्यरूपार्थी ग्रहणज्ञाप

नेन चरितार्थमिति नस्यांशे तदंतविधेर्ज्ञापकमिति आहुः एथांशे वोतुरिदं शब्देन ग्रहणको
ट्यर्थ सूत्रविधानाभावेन लाघवान्नदंतविधिज्ञापकत्ववद्वंशेपि वोटपि सिद्धत्वाच्छलग्रहण
मपि न तदंतविधिज्ञापकमिति केचित्तन्न भामिप्रायं प्राहुः इदमेव यद्धतिपक्षे अरुद्वीचीजं ततश्च वनय
न वक्ष्यति अस्तु चेत्तीस्यपि बोध्यं वक्तुमशक्यत्वेन वोङ्कत्वप्रकारकबोधो वाहुरीसनुक्तेर्नस्या
त्किं त्विदं त्वेवं वसस्यादित्यर्थः ससवेति स्वादिभ्यः परस्य जनपदवाचिनः शब्दस्यानंतरं प्रत्ययवि
धौ तदंतविधिरित्यर्थः ज्ञापकसिद्धं पं सुसर्वार्द्धा दिक्शब्देभ्यः इति सूत्रयोः प्रति परिभाषया जनप
द तदवधेरिति विहितप्रत्ययस्यैव ग्रहणेन वृद्धिविधायकेन तदंतविधिज्ञापनात् इति बुध्यते
जनपदवधेरित्यनुवर्त्तमाने स्वादिः स्वादिभ्यः परस्य जनपदशब्दस्य प्रकृतित्वं तदंतविधौ प्रयोज

61 नमिति वार्णिकार्थः तदंतविधिरिहेति: सुसर्वति ऋत्तोरिति च वाचकमेवेके चितु ऋतोरित्यत्र न प्रतिपदो
क्तपरिभाषाप्रवर्त्तेति प्राहुः एवं एपद्धत्यत्र तदंतविध्यभावार्थं वृद्धिमदित्यस्यैव पर्य्यापत्तेः परिभाषाप्रवृ
त्तौ ऋरस्तु शब्देनाविहितत्वादेवास्याग्रहणसिद्धेः एवं च वार्त्तिक एवायं तदंतविधिः तेन —— षापूर्वभा
गोत्यन्ते पूर्ववार्त्तिकसिद्धिरित्याहुः विशेषणादिति नक्षत्राणां कालेन विशेषणादित्यर्थः ठञ्विधाविति
तदंतस्य परिमाणं संख्यायाः संज्ञासंघेति सूत्रे चेदित्यर्थः ठक् न भवतीति अगोपुच्छसंख्येति संख्यांतादपि
प्रतिषेधात् इत्यर्थः अस्य प्रत्ययप्रतिषेधत्वे प्रत्ययविधाविति निषेधाभावे न तदंतविधिसंभावात्
तदाह संख्याया इति तेनेति उपसंख्यानेन तदंतविधौ संख्यांतादपि ठञ् भवतीति प्रयोजनं तदंतविधे
रिति भावः एतेनाहेंदि सन्न तदंतविधिप्रयोजनत्वेन व्याख्यानं केषांचित्परास्तं वेदितव्यं - किंनस्फलमिद

मिति ननु वैलक्षण्यबोधनद्वारा लुगभावकल्पनापेक्षया सामर्थ्याल्लुगभावकल्पनमेवास्तु वैलक्ष
ण्यबोधने व्यर्थमत आह यद्वेति विधत्त इति तस्य चार्हीयत्वाद्द्विगुनिमित्तत्वाच्च लुगिति भावः
सामर्थ्यकल्पनं व्यर्थमेवेत्याह द्विगुनिमित्तत्वाभावादिति । नन्वेवं सार्थकप्रत्ययप्रक्रमविरोधो दु
ष्परिहरः किं च समर्थविभक्तिप्रत्ययार्थयोर्निर्देशे स्वार्थे विधानानुपपत्तिश्चेत्यभिप्रेत्याह एतच्चेति
पूर्वोक्तास्वरसादेवाह भाष्यकारमते त्विति सार्धमिति तदस्येति विहितठञस्त्वार्हीयत्वाल्लुक्स्या
दित्यर्थः तमधिष्ठइत्यस्य तु तदर्हतीत्युत्तरं पाठादनार्हीयत्वान्न लुगित्यर्थः न विरुध्यत इति ।
न विरुध्यत इति । यथाकथंचित्कालहनिनां च नत्र कालपदेन ग्रहणमिति तात्पर्यं आर्हीय
एवेति एवं च लुग्गुर्वी रत्यर्थः ननु तदस्येत्यधिकारान्तरकरणमार्हीयत्वनिवर्तकमिति वा

६२ यंकृ पञ्चखरितत्वकमोस्याधिकारे नैव सिद्धं तदस्य मुञ्जिरादीयत्वमिवर्जिके समर्थ्येत्वरितत्वात्
वक्ष्यते न लाघवादृद्धिकारत्वे प्रमाणाभावात् द्विषाष्टिकसिद्धये तदस्येति करणं तु न भावः
कल्प्यमानो जीवितपरिमाणे एवेत्यत्र मानाभाव इत्याशयेनाह किंचेत्यादि एवं चार्हीयत्वनिव
र्तकतदस्येत्यस्यानिष्टापादकत्वे नार्हीयत्वनिवृत्त्यर्थत्वस्य वक्तुमशक्यत्वाद्व्यर्थमेव तदस्येति
मुपसंहरति तस्मादिति एवं च भूतवृत्त्यर्थे ठञ्जिसमर्थकं ठञ्विधावितिभाष्यं केचित्तु द्वैषष्टी
परिमाणमस्य संघस्य स द्वैषष्टिः स संघः परिमाणमस्येत्यर्थे ठञ् तस्य द्विगुनिमित्तत्वाभावा
न्न लुक् न च संघे वर्तमानस्य द्विषष्टिशब्दस्य संख्येयपरत्वमित्वात्संख्याशब्दत्वाभावइतिवाच्यं द्वि
षष्ट्यन्तातिरेकस्यापि संघे सत्त्वात्संख्याशब्दत्वमित्यर्थकल्पनया ठञ्विधावितिभाष्यमित्याहुः

अत्र वदंति किमिदमर्थवत्त्वं लक्षणया वा शब्दार्थत्वेन वा आद्येपि द्विषष्ठिपदस्य वा प्रत्ययांत
स्य वा नाद्यः प्रत्ययलुकि संघवाचित्वेन संघवाचित्वार्थप्रत्ययोत्पत्तेरावश्यकत्वेन प्रत्ययोत्पत्तेश्च तद
द्धितविधिसापेक्षत्वेन प्रत्ययानुत्पत्त्या संघवाचित्वासिध्या तल्लक्षणाया असंभवात् अत एवांत्योपि
न प्रत्ययांतस्मात् लुग्विशिष्टस्याभावाच्च नांत्यः एवमर्थबुबोधयिषायां द्विषष्ठिपदस्यैवासिद्धेः त
द्धितविधिं विना प्रत्ययलुकोऽसंभवात् एतेन द्विगुनिमित्तत्वाभावान्न लुगित्युक्तिः खपुष्पस्येव नमनु क
रोतीति बोधितं भवतीति न वक्तव्यमिति ननु समासप्रत्ययादीनां विशेषणविशेष्यभाववैपरीत्यबोधकत्वा
न्तदपवादभूतधर्मो नञ्त्वस्याप्रातिपदिकं विशेष्यं धर्मो विशेषणमिति पूर्वार्थबोधकत्वविरुद्धो धर्मद्व
यार्थकविधर्म शब्दात्प्रत्ययापत्तिरिति नात्र विशेषणविशेष्यवैपरीत्यं युक्तमित्यधर्माच्चेति वक्तव्यमे

63 वेषि कथमेतदितिचेत् न भाष्यप्रामाण्येनानभिधानाद्विधर्माद्गिभ्यो नप्रत्यय इत्याशयात् पदांगो
ति ङ्यापो रपदकस्येत्यर्थः तदंतविध्यपवादोयं तेन वद्विष्टकाचितं वकुमा लाभादिलीस्याद्वैनप्र
वृत्तिस्तदंतविधौ तुस्यादेषदोषइतितदंतविध्यपवादोयं तदुत्तरपदविधिरितिवार्तिकद्वयं तदंत
विध्यपवादत्वाभावे वार्तिकेतस्यैतस्यापि स्वार्थस्यात्त्वसेवसुकेऽरिसपि वोध्यं उत्तरपदाक्षिप्तं पूर्वप
दमिष्टकादिभिर्विशेष्यते तदंतविध्यपवादत्वाच्चविशेषणे एवेदं प्रवर्तते शब्दस्वरूपं विशेष्यमिष्ट
कादयो विशेषणानीति नुके परान्येकैपटादयइति उदाहरणस्य संकोचकत्वे तत्रविशेषएवतदुत्तर
पदग्रहणं स्यान्नत्वान्महतइत्यादौ केवलपदाधिकेचित्तु वार्तिके तदंतस्येत्येन पाठः इतिपरिभाषेंदु
शेखरे ननु परमश्वासावतिमहांश्चेति समासे अतिमहच्छब्दोत्तरपदकेन महच्छब्दत्वं नापि महदुत्त

रपदकत्वमितिवार्त्तिकेनासिद्धिरिति वदता तदुत्तरपदस्येति पाठस्यास्पष्टं बोधनात् आरंभप्रसारव्या
नसमयफलत्वायबहुच् पूर्वस्यानभिधानमेवेति प्राहुः शेषमत्रगृह्यतइत्यस्वरसइति केचित् नन्वत
त्रैव भाष्य एवं तर्हि पदाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्येदं प्रयोजनं हि मकार्षीस्तु
पादानेनतदधिकारग्रहणं बोधनात् केवलपदाधिकारग्रहणस्य भाष्येऽसाधारणप्रयोजना
सत्वाच्चेति प्राहुः वाचस्पतिरिति विभिन्नपदत्वे दोषाभावेपि समस्तस्य साधुत्वार्थं व्याख्यानमिति भा
वः प्राग्वदिति· सततशब्देनैनैशतमोवृतशब्देन बहुव्रीहिः मत्वेत्यर्थविवरणमात्रं पद्युष्मदस्मदि
ति आदिपदांतं समस्तमेकं पदं परादयोऽनडुहानुम् च तदंतविधेः प्रयोजनमित्यर्थः अनडुदंतस
मासेऽनडुहानुमोन्वयेनासामर्थ्यात्समासानुपपत्तेः स्थितमिति एवं च वार्त्तिकस्यत्वेपि कीदृशो।

64 विशेषणविशेष्यभाव इति नियतं तु मशावपत्वात्प्रयोगदर्शनेनैव व्यवस्थेति भावः वकृन्नीहिरिति त
त्पुरुषे तु टच् स्यादित्यर्थः मग्यमिति वकुवचनादेर्गमकस्याभावादिति भावः लक्ष्यैकचक्षुष्कत
यातदंतग्रहणेनैवेति तदंतग्रहसाधनेन सूत्रेणैवेत्यर्थः नविस्मर्त्तव्यमिति द्विधपादोपहतमि
त्याद्यर्थं आख्यानस्य आमि सर्वनाम्न इति साहचर्यात्प्रयणे तु न मानं इत्यपि बोध्यं प्रयोगानुरोधेनैवव
क्रव्यतयावकुचू पूर्वे नातिप्रसंग इत्यपि बोध्यं लभ्यते इति नवीनाः स्त्रियान्यमिति से इत्यादौ तादृशास
मुदायव्यभिचारेणाक्षेपासंभवात्प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादौ सुपस्थितस्य योगप
विभक्त्यंतस्य प्रत्ययेन विशेषणाद्यन विधेरिति सूत्रसिद्ध एवतदंतस्येत्यपाइसाकुः सुप्तिङं तमिती
ति संज्ञाविधौ प्रत्ययग्रहणेन तदंतविधौ सति नरस्मभवं तस्य घसंज्ञा घरूपे सादोघातेनोत्तरपदविशे

षत्वे पुनरुक्तदंतविधौ घांतानां उत्तरपदे द्व्यस्यर्थ्योपत्तौ ब्राह्मणी परमकुमारितरे त्यादौ ह्रस्वापत्तिः नच
स्वेस्वग्रहणादुत्तरपदाधिकारे प्रत्ययांताग्रहणबोधनात्तथ्यमेतदिति वाच्यं उत्तरपदाधिकारेपि रि
भाषयातदंताग्रहणबोधनेपि संज्ञयातदंतोपस्थितौ बाधकाभावात् स्वेस्वग्रहणादिति प्रत्ययग्रह
णे रूपग्रहणं स्वेस्वग्रहणादिति ज्ञापकपरं भाष्यकभाष्यप्रामाण्यात्तस्मिन्नेव घेनोऽनभिधानमिति भा
वः प्रत्ययस्य विशेषणमिति ननु रदाभ्यामिति न निष्ठाविशेषणं निष्ठायाः पदार्थैकदेशत्वेन तत्रान्वयासं
भवात् नच लुप्तषष्ठीकनिष्ठापदस्य पृथक्पदत्वेन तत्रान्वयसंभव इति वाच्यं गौरवात् चरितनिष्ठा
द्ध्याविरोऽध्यवधायकत्वेन तकारस्य नत्वप्रसंगाच्च तथाच न पंचम्यंतं प्रत्ययविशेषणमिति चेत् अ
त्र प्राहुः निष्ठातकारे रदाभ्यामुत्तरत्वस्य निष्ठायामुत्तरत्वनांतरीयकतया रदोत्तरत्वं प्रत्यये प्रतीये

65 तावतैवात्रप्रत्ययविशेषणत्वं अत एव कैयटेन यत्र पंचम्यंतात्परः प्रत्ययः कार्यांतरविधानाय परिगृ
ह्यत इत्युक्तं परिगृह्यत इत्यस्य नांतरीयकतयाश्रीयत इत्यर्थः यत्रापरिगृह्यते अनूद्यते अनुवाद
श्चोद्देश्यविशेषणत्वेनेति तु परे अपंचम्या इत्यत्र निषेधार्थको ऽ शब्दः तेन पंचम्यंतात्पर प्रत्ययग्रहा
धिकरणे सूत्रे प्रकृतस्तदंतविधिर्न इत्यर्थमभिप्रेत्याह नेत्यर्थ इति यथाश्रुते ऽर्थो संगतिः स्पष्टैव
यत्तु कैयटेनोक्तं अपंचम्या इत्यस्य यत्र पंचम्यंतात्प्रत्ययो विधीयते तत्र तदंतविधिर्नेत्यर्थः क्रियमा
णे ञितश्च तत्प्रत्ययादिति त्र ञित्प्रत्ययादेर्वा त्रिविधीयमाने उष्ट्र शब्दाद्विकारे वुञि तद्विकारे ञित्त
श्चेति विधीयमानो ऽनुवुञ्प्रत्ययादेर्वस्यादिति वुञ एव वृद्धिस्वरौ स्यातामिति तन्नुपयोजनं सर्वना
मसादीन्सूर्वतदंतविधिवाधकानीति कैयटोक्तपक्षे समासप्रत्ययेत्ति निषेधः सोऽपि तदंतविधेर्नत्

पसंख्यातस्य अपं चम्पाइति तूपसंख्यातस्येत्यभिप्रायेण एतेन समासप्रेसनेन गतार्थत्वमपास्तं अ
परे तु कानि पुनरस्य योगस्य प्रयोजनानीत्युपक्रम्य सर्वे सायुक्तो नापूर्वस्तदंतविधिः कैयटे अपूर्वत्वोक्तेरय
मभिप्रायः अन्वर्थसंज्ञाक्षिप्तसंज्ञिविशेषणत्वात्तदंतविधिः शब्दरूपं विशेष्यमादाय वा तदंतविधिरिति
न युक्तं आक्षिप्तस्य शाब्देऽन्वये मानाभावात् गवादिपदानां व्यक्तौ लक्षणायाएवाक्षेपपदार्थत्वेनानन्यलभ्यत्वेनाक
र्मत्वान्वयानुपपत्तिः शब्दरूपं तत्व्यावर्त्तकं वार्त्तिकसंज्ञाप्रतिषेधोक्तेरन्वर्थत्वं तदसंमतं च अव्यावर्त्तक
विशेष्यस्य शब्दस्वरूपस्येति शब्दासमभिव्याहारेऽन्वयाप्रतियोगिनो वार्त्तिकवचनात्तस्यने मानाभावाभा
व - तस्मात्सर्वादिपदे न तंत्रोपस्थितसर्वादीनां विशेषणत्वात्तदंतविधिः अ्रूपं च तंत्रमर्थवत्सूत्रे पृथक्
शब्दानुपात्तविशेषणविशेष्यकत्वेन तदंतविधेरपूर्वत्वं तथा चापूर्वतदंतविध्यभावात्सौत्रस्येवापं चम्पा

66 इतिनिषेधइति अयंच म्याइतिमर्थमेवस्यात् समासप्रेति निषेधसिद्धेरिति कैपदार्थइतिमाहुः ननुपं
चम्यंतात्पर प्रत्ययानुवादे अपं चम्याइति निषेधे सुपिचरोः सुपीत्यादौ सुवंतेइत्यर्थो उर्वोरः तत्रपंचम्यंता
त्परत्वेन प्रत्ययाविशेषणादिति चेत् अत्राहुर्भट्टाः तस्मिन्निति परिभाषया सुपि परेइत्यर्थे नियमेनकस्मा
दिस वधित्साकांक्षत्वेनोपस्थितांगादेरेवावधित्वेनान्वयेन पंचम्यंतस्य विशेषणत्वेन निषेधप्रवृत्तेरिति
तन्न उपस्थितांगस्यावधित्वेपितस्य पंचम्यंतत्वाभावेन निषेधाप्रवृत्तेः किंच सुबुपश्लिष्टो दीर्घइत्यर्थक
स्यकपरिभाषया कथं सुपि परेइत्यर्थ कल्पनं पर्यवसितार्थस्य शाब्दाकांक्षोत्थापकत्वाभावात् च तस्मा
दतः परसुबुपश्लिष्टांगस्य दीर्घइत्यर्थे सुवंतेइत्यर्थे पंचम्यंतात्परत्वेन प्रत्ययविशेषणान्निषेधप्रवृत्तिः
किंच सुपि परेइत्यर्थेऽवधित्साकांक्षत्वेनोपस्थितांगादेरेवाकांक्षानिवर्त्तकत्वेनान्वये षष्ठ्यंत स्यतादृशा

कांक्षानिवर्त्तकत्वाभावेन पंचम्यंतत्वकल्पना अलंकारेऽलविशेषणार्थ्येन षष्ठ्यंतत्वं चेति अंगस्येत्यस्या हस्यायस्या
गौरवं किंच भाष्ये षष्ठी प्रकल्प्यि पक्षो वेतात्याभ्युदयमनुकरोति किंच सुपीत्यादेरोपरयद्याभावेन कस्मादि
त्याकांक्षानुदय एव किंच परिभाषया सुपि परे इत्यर्थे इत्यस्य फलितार्थे इत्यर्थकत्वे पित्तस्य शाब्दत्वाभा
वेन तत्र शाब्दान्वय इत्यस्यास्यनुतत्वं तस्मात्ततः परसुब्व्यवहित पूर्वस्यांगस्य दीर्घ इत्यर्थे पंचम्या इ
ति इति निषेधान्न सुब्वंत ग्रहणं ध्वनितश्चैवमन्वयोऽगस्येति सूत्रे भाष्ये यद्वा उत्तमैकाभ्यां कोटरायेभ्यइ
त्यादि निर्देशैः सप्तमी निर्दिष्ट प्रत्यये यस्मात्प्रत्ययविधिरित्यत्रादीत्यंशानुपस्थिति रूप्यते ते न विशेष्या
संनिधानान्न सुब्वंत ग्रहणं अत एव रोसुपीत्यत्र पंचम्यंतताभावेऽपि न दोषः सुपि चेत्यत्र तु पूर्वोक्तांगसंत
रमपि बोध्यमिति प्राहुः तदेतत्सर्वं मनसि निधायाह विशेष्यतयेति अपंचम्या इत्यपि विशेषणविशेष्य

67 भावप्रत्ययासमूचकमेवेत्याह सकलं सूत्रेणैवेति अपवादमिति तेनसमानाधिकरणविशेषणे एवेदं प्रवर्त्तेत
इतिउः सीसादौ मादेः परस्येतिनार्थः स्वरूपसत्येव च सप्तम्यन्तग्रहणं लिंगं अन्यथानेड्शीसादौ चप्रादे
रित्सर्थीभावः स्यात् तीषसहसेः सिचीसादौ तु प्रथमार्थे सप्तमी प्रथमोत्तस्य चान्यत्रान्वयासंभवात्स्व
स्यानुरोधाच्चवलात् पदार्थैकदेशावयवोऽभेदेनान्वयान्मादेः सादेरित्सर्थभावः नच विशेषणे प्रवृत्तिमा
त्रेणापवादत्वेपि चरितार्थे अधिकरणविशेषणेपि प्रवृत्तिरस्तु उः सीसादौ तु परस्येतिन संबध्यते लक्ष्यानुरो
धान्मंडूकप्लुतिरत्र स्वेतितादेरित्सर्थभाव इति वाच्यं आर्धधातुकस्येड्वलादेरिति सिद्धे आदिग्रहणेनोभयो
: सप्तम्यन्त एव प्रवृत्तिरित्सर्थस्य ज्ञापितत्वात् इति दिक् ॥ वृद्धिर्यस्याचामादिस्तद्वृद्धं ॥

कौ- एतं नएव नतु घर्त्तं तः अनभिधानेन घत्रो नुमतेः अन्नव त्सापकल्प्ववर्गे नपरं भाष्य मेव प्रमाणं न एसहृदयैव
इतिप्रयो गाभावादिति ध्येयं. वद्धिर्प स्या पत्तहोर म नरस्वर्ग क्षस्ये पादेव तस्माभान्। गोचा ताहे
पिपरिभाषानुपस्थितिरित्याह श्नमइति इट्टागमइति श्नमइतिशेषः साहचर्यादिति आभ्यस्त
योरित्युत्तरसूत्रसाहचर्यादित्यर्थः अनुवर्त्तमानेनेति अतउदित्यतः विशेष्यत इति --- सामा
नाधिकरण्येनेत्यर्थः स्थितमिति ननुसत्सप्तमीत्वेपिनंदमानेदोषानुद्धार इति चेत् पंचम्यावि
परिणामेनकिंकृतोनशब्दान्तरस्येत्यर्थेनभाष्यएवसमाधानात् इतिबोध्यं वस्तुतस्त्वेवं यामनास्थि
तमिति प्राचांग्रंथेइतिशेषः पूर्वपक्षत्वात् प्राचांपक्षत्वात् अनास्थयातथोक्तमिति अपरि
ष्कृत्यैवसत्सप्तम्यांपरिभाषाप्रवृत्तिरित्युक्तं तदपरिष्कारस्येत्यं तस्मिन्निति सूत्रेनिर्दिष्टइत्यधिर

२५ रणसहाप्येवकारकसप्तमीत्वाद्बलवत्वात् एवमचीत्यादि एवं च कारकसप्तम्यामेव परिभाषा
प्रवृत्तिरिति युक्तं किं च सत्सप्तम्यां परिभाषाः संभव एव तथा हि अचि सति यण् भवतीत्यर्थे यत्र
क्वाप्यचः सत्तामात्राश्रयण प्रसक्तिवारणाय परिभाषा अपेक्षितव्या तर्हि सप्तमी अचीत्यस्य विधेयक्रि
यान्वये यो विधेयक्रियाकर्तुर्विधेयतया तेन तयोर्वोपपर्योसंभवात् पूर्वस्येति षष्ठ्याः अनन्वयाच्च त
स्य अन्यत्रान्वयो अन्यत्र तन्निरूपितपूर्वत्वस्यान्वय इत्यस्य व्युत्पत्तिविरुद्धत्वाच्चेत्सत्यं उपश्लि
ष्टपदाध्याहारेण उपश्लिष्टस्येको यण् भवतीत्यर्थः संहितायामिति सूत्रस्थभाष्यसंमतः प्रयो
गसिध्यतीति असद्वृत्ति यद्यपि तथाप्यागमहिंगात्वस्य मान स्यात् इत्यस्यावयवषष्ठीमेवेसनि
यतयोगाभावात्स्थानषष्ठीत्वाभाव इति शेषो बोध्यः ज्ञापकादिति आकुणइत्याद्यावादचीसन

योः षष्ठी प्रकल्प्यकत्वे द्वयोर्गुणस्थानित्वे न विधेयाहृत्ते गुणानुरोधेनान्याय्यत्वादेकस्मिन्नादेशो
द्वयोः स्थाने सिद्धत्वेनैकग्रहणं व्यर्थं सज्ज्ञापकमिसर्थः वहोरिति पंचमीति ननु लोपादेशयोर्वि
धानसामर्थ्यात्सवर्णयोर्भविष्यन्ति॰ लोपपक्षे प्रत्ययमात्रस्यैव यदिति वक्ष्यवर्णमस्त्विति पंचमेवेति
कुत इति चेन्न पर्यायेणैकस्यादेशद्वयविधौ वहो भ्रं लोपावितिवक्तव्ये पृथक् वहोरित्युक्तिसाम
र्थ्यात्भैकविभक्तित्वमिति निश्चये विनिगमनाविरहेपि व्याख्यानात्पंचमीत्वमित्याशयात् अन्ये तु
भ्रूवहोरितिसंत्यक्यित्वा पूर्वसूत्रसाहचर्याद्धादेशं विधाय द्वितीयं वहो लोप इति सूत्रं पुनरसूत्रेऽ
पि मयसां मध्ये इत्थस्य यद्विधाना द्वहोरिमस्य पंचमीत्वनिश्चयात्तत्साहचर्यात्पूर्वसूत्रेपि पंचमी
त्वं एतेनोत्तरसूत्रे प्रत्ययस्यागमित्वात्पूर्वसूत्रे प्रत्ययस्यैवाहरादेशाः किमिति नेति शंकापिपरा

३ —

25 स्येति प्राहुः तथा गोतइति अचरितार्थेति शेषः अनंगत्वादिति नचाणित्वसामर्थ्यादनंगत्वेपिवृद्धि
रितिवाच्यं ञ्णित्यंगकार्येत्यस्यायोगेनानंगस्य वृद्धिविधायकवचनकल्पनापेक्षया षष्ठीकल्पनेला
घवात् आज्जसेरितिसूत्रेकृतार्थपंचम्याः वयचीति सप्तम्याऽचरितार्थयाषष्ठीकल्पनादाह प्राय
णेति अनवकाशेति उत्तरस्यासंबंधादित्यर्थः उत्तरार्थतयेति त्रेस्त्रयइत्यर्थतयेत्यर्थः आदित्यनुवृ
त्तयेति आज्जसेरित्यतः यदित्विति सूचितामरुचिंस्पष्टयति वस्तुतस्त्विति विहितस्येत्यध्याहारे
सामानाधिकरण्यार्थं आमइतिषष्ठ्याविपरिणामः अतइत्यनेनपरत्वेनविशेष्यतइत्यर्थः अथवावि
हितपदेनपंचम्यर्थोन्वयाद्यामाऽनन्वयाद्युत्तरत्रामीतिसप्तम्याः पूर्वसूत्रेअसुग्विधायकेपंचम्या
श्चचरितार्थत्वात्परत्वाद्यादिसेवसप्तम्याः षष्ठीकल्पयतीत्यर्थः पूर्वव्याख्यानेविप्रतिषेधविषयो

उः सिधुङिति द्वितीयेत्वयमपिविषयइतिबोध्यं चर्त्वेनेति छस्यतुक् परत्वादित्यर्थः चकारद्वयमिति
पद्यपिपसंतांद्वितिविकल्प्या नुग्नास्तीत्यपिवक्तुं शक्यंतथापिवैकल्पिकेषुशास्त्रानुष्ठानरूपधर्माधि
क्यफलकत्वेन तुक्सहितपाणिनिपाठमभिप्रेत्यद्वाप कवर्णेनमिदं द्विगिति द्विगर्थस्तरूषष्ठीपदानुरो
धोगौरवं उभयोः कल्पकत्वाभावायपरत्वानवकाशत्वादिगवेषणंच इकोयणिसादौ श्रुतषष्ठीस्य
स्यपरिभाषाप्रवृत्त्यनापत्तिश्च किंच इकोयणिसादौषष्ठ्या अनुवादत्वं उःसीत्यादौविधेयत्वंचेति
क्लेशादयंपक्षोभाष्येकस्यचिदेकदेशिनोनसिद्धांतिनइतिबोध्यं स्वं रूपं शब्दस्या स्वंरूपंसंज्ञिशब्दः
संज्ञा स्वरूपयोः शब्दःसंज्ञेत्यर्थः स्वशब्देन स्वस्वरूपात्मावाची आत्मवाचिनःपुंस्त्वात् रूपग्रह
णंवैयर्थ्यापत्तेश्च किंत्वात्मीयवाची आत्मीयंचार्थः रूपशब्देनस्वरूपं एवंचात्रयास्त्वेशब्दः शब्दा

२८ र्थोभयबोधकइत्यर्थः पर्यवसितइत्याह संज्ञीति एतेन संज्ञेत्यस्य आह र्तुशक्यमित्यपास्तं पूर्वविनि
र्देशात् रूप्यते बोध्यतइति रूपमर्थः सोपि बोध्यइत्यर्थपरभाष्यविरोधात् प्रयोगसमेति अग्न्यादि
शब्दाएवेत्यर्थः एतेनाग्निशब्दस्याग्निशब्दवाचकत्वमयुक्तं शक्यत्वशक्तत्वयोर्भिन्नाधिष्ठानत्वा
दित्यपास्तं उच्चारणभेदेन शब्दभेदात् शक्तियाहकं तु स्वं रूपमिति व्याकरणमेव घुधातोरिति
ननुसंज्ञाविधिसामर्थ्यान्न धातोर्ग्रहणमिति चेन्न ईहल्यघोरित्यादौ संज्ञायाश्चारितार्थ्येन किं घुधा
तोरेवस्यात् आतईत्वविधाने नाघोरितिपर्युदासपर्युदस्यमानघुसंज्ञकस्यैव ग्रहणात् ननुद्विवि
धसंज्ञासत्वात् द्वयोः किं स्यादिति चेन्न परत्वात्स्वं रूपमित्यनेन बाधशंकावारणार्थमशब्द संज्ञेति
सूत्राशयात् षांतस्यषट् संज्ञाविधाने न शब्दशास्त्रीयसंज्ञानां स्वरूपाग्रहणज्ञापने तु व्यर्थमेवेत

त्वरूपग्रहणप्रयोजनं शंकासमाधानाभ्यामाह स्यादेतदित्यादि तदेव आत्मीयत्वेन शब्दस्वरूप
मेव नन्वर्थस्याप्यात्मीयत्वेन कथं रूपमात्रग्रहणमत आह प्रतीताविति शब्दश्रवणे स्वरूप
प्रतीतेर्न शक्तिग्रहणापेक्षत्वमित्यर्थः ज्ञापका इति रूपवत्ते बोध्यते यत्तु न रूपं अर्थः तद्बोधका
रूपशब्दा इत्यर्थः तत्रार्थप्रातिपदिकत्वस्य प्रसंगस्य पूर्वस्यासंभवाच्छब्दद्वारकग्रहे प्रमाणाभा
वाद्वृद्धिसामर्थ्यात्तदर्थकद्व्यावच्छब्दग्रहणे प्राप्ते नियमार्थं सूत्रं एवं चार्थविशिष्टः शब्दोपा
तपरस्यार्थः फलितः न चांतरं गत्वा उपस्थितशब्दस्यागे मानाभावादुपस्थितार्थस्य सर्वथात्यागे मा
नाभावाच्चार्थसत्वमिति वाच्यं उक्तन्यायसिद्धार्थानुवादकसूत्रेण शब्दार्थविषये वृत्तियुक्त्या
यत्नाश्रयणस्य ज्ञापनात् तेन लस्यापत्यमित्यादौ न दोषः देवतापशुरुद्रीचां प्राचामित्यादौ च अ

२७ र्थकार्यस्याबाधात् इति सूत्रस्य इत्यर्थः शब्दा एवेति अस्मादय एवेत्यर्थः शब्दार्थाभियोपस्थिता
वपि शब्दज्ञानपूर्वंकत्वादर्थस्य स्वस्यैव प्रथमोपस्थितस्यागमानाभावात्सौवीपर्यसंभवान्वयीयाणा
मुपस्थापकाभावाच्चसूत्रोपस्थिता एवेति भावः यद्यपि सौत्रेभ्यो भिन्ना एवमस्मस्यप्रकृतिभूतास्त
थापि सादृश्यात्त एवेति अस्मभिन्ना सर्वं शीपशिखेति वदिस्यापि बोध्यं अधिकाराच्चेति तेच अस्मासमो
रूपस्थितत्वाद्यास्मादय एव न पर्याया इत्यारंभादिति अत्र शंकुः ईदूतिति द्विधोर्न अस्मत्तत्वान्त्यात्तमी
त्वेनेत्यर्थः एतेनाघोरित्येव पर्युदासे संज्ञाचरितार्थेस्यपास्तं षांतसंज्ञाविधानेन शब्दसंज्ञायां स्वरूपग्रह
णं नेति केचित् तन्न टांतस्य संज्ञास्वरूपत्वेन षट्स्विसादावेव षट्चीस्यादि स्वरः स्यान्नत्वशासां तुकुन्ने
स्यादिति षांतस्य संज्ञाविधासार्थक्यात् उुइति वत् टांतेव संज्ञो न तु षकारांतानां प्रमाणाभावादिति शंकुः

संज्ञि क्वचिदिति सर्वे सर्वार्थाः इति नयेएकधर्मि बाधकत्वं संज्ञायाः शास्त्रे संकेतयति यत्र संकेतस्तत्रान्य
बाधाभावो र्थादित्यार्थिकोऽयं नियमः पूर्वत इति न त्वियं परिसंख्या दोषत्रयवत्त्वात् अयमेव शास्त्रसंकोच
पदार्थः कटादिवच्छुन्नेः सावयवत्वाभावात्कात्स्न्यादृश्यः संकोचः एतादृश संकेतस्य प्रकरणरूपत्वेन वि
शेषावगतिहेतुत्वं अत्रेदं बोध्यं आकडारादेकस्य विरोधाभावात्संज्ञानां बाध्यबाधकभावे प्यत्र विरो
धाद्बाध्यबाधकं भावः स्वंरूपमित्यस्य सामान्यस्य घुसंज्ञारूपविशेषेतरविषयत्वं तं त्रांतरन्याये
नवारयमितिनष्पद्दोषः अयमेव बाधपदार्थः एतेन द्वयोर्युग्रहणेन ग्रहणं स्यात् स्वं रूपमित्यने
न परत्वाद्बाध एव वा स्यादिति परास्तमिति पाठात्सिद्धेति वस्तुतस्तु साहचर्याद्वाधजधान्तोर्ग्रहेण
भाजिग्रहणं सार्थकं भाशधातुनाविभागादिति सिद्धेऽर्थे चेयत आह न्यायमसिद्धावेति एतेन शीघ्रो

२४ पठ्यिति मङ्गलकत्वेन अभिव्यक्तपदार्था इत्यनेनानर्थकाप्रसिद्धार्थकसंज्ञा शब्दव्यावृत्तिः नेन संज्ञाश्च
शुराद्यन्न स्वतन्त्राः न वृत्तिगुणाभ्यागमनपेक्ष्य प्रवर्त्तमानाः तेन गोणव्यावृत्तिः लोकविश्रुताः लोकप्रसि
द्धाः तेन प्रसिद्धार्थकाप्रयुक्तच चंतीत्यादेरसाधुत्वं बोधितं भवति न तद्वृत्तिषु न तत्सदृशेषु समानश्रुतिश
ब्देष्विति तस्यार्थः नारंभणीयमिति· ननूपसर्गे घोः किरित्यादौ उभयग्रहणं निवृत्त्यर्थं शास्त्रसंज्ञेति निषेध·
आवश्यकः सांतायडिति षकारान्ते षट् संज्ञाविधानसामर्थ्यात्संज्ञायां स्वरूपग्रहणं नेति भाष्यात्स्पष्टं स्व
सावर्ण्यादेवेति एकस्थानप्रयत्नत्वादित्यर्थः कथमन्यथेति स्वस्य स्वसवर्णत्वाभावे इत्यर्थः तत्रव्यक्ती
ति नकाररूपव्यक्तिभेदात् इह त्वकारभेदानेत्यभिमानेनेदं वस्तुतः प्रसूच्चारणभेदोऽस्तीत्याह इहापी
ति एवं रीत्या सावर्ण्यीयपादेनेपि द्वितीयस्य प्रत्यर्थं जातिपक्षस्य वाणुदित्सूत्रविषये आवश्यकत्वेना

एष्वपि स एवोचितइति प्रसाख्यातमग्रहणमिति तत्रत्वपि सुपसुप्तमतइति बोध्यं तथेति अणु
दिदित्त्रयथातथ्येर्सः नादिचीति अवि[illegible] अकारग्रहणाभावे व्यर्थं सत्त ज्ञापकमित्यर्थः हस्वस्याग्रो
यमिति हस्वादीनां योऽहंइसर्थे ह्रस्वशब्दद्वयस्यैकशेषेण सहप्रयोगाभावात्पर्यायाणां विरूपाणाम
पीत्येकशेषात्सामान्यविशेषयोर्वाचनिकद्वंद्वनिषेधसत्वाद्विशेषणमेवग्रहणसिद्धेर्न्यायसिद्धमिद
मितिकेयरः प्राच्यभरतेष्विति निर्देशाद्विनिसः सन्निषेधइति वाचनिकमेवेदमित्यन्ये पिस्मयोयेति वाचनि
कमेवेदमग्निमं च पर्यायवचनइति विभिन्नानुपूर्वीकत्वे सत्येकशक्यतावच्छेदकत्वंपर्यायवचनत्व
मिति फलितं अयमेतस्यपर्यायइति कथंतत्राह भीमइति स्त्रिदित्यपि वाचनिकमेव हस्वादौराजा
दैवेति हस्वादावुक्तो न्यायः राजादौसभाअराजेति छित्वान्नस्त्रिचपुत्स्मायेन राजशब्दभिन्नस्य राज

२९ शाब्दार्थवाचकपर्यायस्यैव ग्रहणमिति· अणुदित्सवर्णे· एतत्सद्बोध्योऽयमर्थ इति शास्त्रे ग्रहवदे
तदर्थबोधकमेतत्सद्रमिति पद्योद्देश्यकबोधकत्वविधेयकशक्तिग्राहकमेतत्सूत्रमिति भाष्यप्रमण
पदस्य तेन यत्र तु व्ययोगः भाष्यप्रमिति न्यायविरोध इति बोध्यं एतेन सवर्णस्य संज्ञा अणित्यर्थे पठेदि
ति न्यायविरोध इत्यपास्तं अणपरेणेति कृतधातोर्ऋकारस्य च्वीकृतदित्यत्र दीर्घस्थाने ह्रस्वऋकारवि
धायके उर्ऋदिति सूत्रेन परकरणमवलिङ्गं पूर्वेणाणित्यस्य उद्देश्यपन दीर्घग्रहणं ह्रस्वस्यैव स्थानि १
त्वमादेशत्वं चेति आदेशांतरनिवर्तकत्वेन स्वरूपाभ्यनुज्ञानार्थत्वेनाविधीयमानत्वान्स्थानेतर
तमइत्यनेनऋकारस्यवारणेन तपरस्तज्ञप्रहणस्यार्थलाभाचेन च सामर्थ्यसत्परेणाणग्रहणं बोध
यति परेणाणित्यस्यत्तूद्देश्यत्वा दीर्घस्या पूर्वे ह्रस्वादेशाविधायकत्वमस्तु भिन्नकालव्यावर्तक

त्वेनैव भिन्नकालस्यापि तत्संपादकत्वेन सार्थक्यमिति भट्टानामाशयः वस्तुतस्तु परेणाऽऽ एवाधनेऽपि वि
धेयत्वेन सवर्णग्रहणाप्रसक्तेः अयं सत्प्रत्ययः इति निषेधस्याप्यनित्यत्वं बोधयति क्वचिन्नेन चोः कु - र
इसो सरिमासे दीर्घकारकवर्गयोर्ग्रहणसिद्धावुदित्करणसामर्थ्येन कस्मान्मिति प्राहुः चकारादिति
दूरं संस्तरी सा इकारादिषु कालपुरुषाद्युपाधिभेदेन स्थानेषु भेदमारोप्य तुल्यस्थानत्ववदकारेऽपि
तत्सत्वात्सवर्णग्रहणासिद्धेरिति प्राहुः ह्रस्वान्तेभ्य इति अत्र सूत्रे दीर्घोणामनणत्वमित्यपर्यालोचयेदं
एवमेवाप्यनआविति वाधयं विलितिवर्णस्वरूपापेक्षसंज्ञासापेक्षसवर्णसंज्ञोत्तरकालिकग्राहकशा
स्त्रे वाध्यार्थस्य स्वबोधकालेऽभावेन ग्रहणकशास्त्रेऽण्पदस्य दीर्घादिष्वप्रवृत्तावप्यन्यत्राणपदेन
दीर्घग्रहणे बाधकाभावः वर्णोपदेशादिषु चेति यथा सुशिक्षितोऽपि नटः स्वस्कंधमारुह्य न रीनर्त्तिती

30 कृणोऽर्थो सर्वो आत्मच्छेदाय प्रभवतीति तथेदं सूत्रं स्वांगेषु न सवर्णग्राहकमिति भावः इत्यभ्युपगमादिति अ
यमेतस्मन्केत्संज्ञाफलकानुनासिक्यवानितीत्यर्थः उच्चारणार्थेषु तु नि हितिफलकेत्संज्ञाफलकानु
नासिक्यवत्त्वं तदूपमेव वर्णो इत्येवमतीति व्याख्यानपरंपरयैव निर्णेयं तदुक्तं व्याख्यानतो विशेषप्रतिपत्ति
रित्यादि एतेनोच्चारणार्थेष्वित्संज्ञायाः अभावेनिकृत्यनापत्तिरित्यपास्तं ध्वनितमिदं परावितावितिव
दतोके मुद्याभिप्तिप्राहुः सूत्रांतर्गतेष्वेवेति आद्योच्चारणे विद्यमानमंत्यमित्यर्थः आद्यमुच्चार
णं यस्मिन्काले इति बहुव्रीहिणा उपदेशोऽस्यास्मिन्नित्यर्थो आद्युच्चारो वाऽभिव्यक्त्युत्तरकाले इत्यर्थो
वा अभिव्यक्त्युत्तरकाले इत्संज्ञायायुक्तत्वात् उपदेशोत्तरकाले त्संज्ञेति भाष्यात् तत्राद्युच्चारणसादे
हलश्रमाहारसिद्ध्युत्तरं णादिनामित्संज्ञा अन्यथा हल्ग्रहणे इदं कृत्स्ना हावंतरं गत्वा उच्चारणेनाभिव्यक्त्यु

न्तरमव्यवधाने नैवेत्संज्ञेति भावः आनुपूर्व्यादिति लोपे सति स्वरूपबोधनासंभवापत्तेरित्यर्थः इ
त्संज्ञानुपयोगे शापश्चाश्रयणेन पूर्वमेव स्वरूपेति नन्वज्ञानोत्तरकाले लोपः उपस्थापको नुबंधरहि
तरूपानुबंधरहितमुपस्थापयतीत्यर्थः इदं चानुबंधानेकांतत्वपक्षे बोध्यं उपस्थितश्चानुबंधो
पलक्षितोऽरो वेति भावः सवर्णग्राहकत्वं प्रत्ययभिन्नस्येति नेत्याद्दोदीर्घोदिप्रसक्तिरिति उचितमित्य
स्याभिप्रायः सिद्धांत इति न्यायसिद्धार्थानुवादकमेव नासिके स्यादिलिंगमंदमतीनामिति सार्थकमिति
भावः अर्थवत्त्वमाशंक्येति आरोप्येत्यर्थः तदाह अन्योहीति ननूपस्थाप्यस्याप्रयुज्यमानत्वादित्सं
ज्ञाप्रयुक्तकार्यविभक्त्यर्थान्वयश्च तत्र न स्यादत आह इत्संज्ञाकार्यत्वेति उपकारकत्वमर्थमुपकार्य
पलतीत्यर्थः क्षेपिष्ठादेवतेस्तत्रेत्संज्ञाकार्यकारित्वं योगादित्येवेत्यर्थः अन्वयोप्येवमिति आरोपितार्थ

31 निमित्तविनमर्थस्यारोपिते प्रकृत्यर्थ एवान्वयः आरोपितार्थस्यैव प्रकृत्यर्थत्वादित्यपि बोध्यं समाधा
नावेति यस्यानिकोधस्यानिकोवाचत्वे स्यासिद्धत्वान्नायं दोष इति न्यूहरोपविस्यओमत्रापियो
ग्यमिति भावः दूषणायेति व्याख्यानक्लेश इत्यादिनावैषम्यादिति भाष्यमानोपुकारः सवर्णे
न्वयकृतौ त्यर्थज्ञापनार्थोयं नकारस्तेनादसोसेरिति दीर्घसिद्धिरिति मिलत्वमित्तमिति सूत्रे भा
ष्योक्तेर्भिन्नकालाग्रहत्स्यर्थे तयासार्थकस्पट मुचीव सामर्थ्यविरहात्स्वरिताप्रवृत्तिरिति भावः
ननु भिन्नकालवारणाय कृतमपि घटायोन्मीलितिव्यायेन स्वरितं प्रवर्तयेदेवेति चेत् किमोदि
सादेः सास्याधिनिति स्वरितमिति शास्त्रं परं परस्याधिति न प्रवर्ततेत्यत्राशयात् तत्र सामर्थ्यवि
रहात् ननु स्वरितार्थ एवायं तकारः कुतो नेति चेन्न वकारस्य स्वं सनधर्मिणः स्थाने जायमान

स्यो कारस्य स्यानुदात्तत्वे नेकारस्य यणि स्वरितस्योदात्तस्वरितयोर्यण इति सिद्धा स्वरितार्थत्व
स्य च नुम शक्यत्वात् घुभि रकुभि रि स्यादावुकारस्योदात्तत्वार्थं मुदात्तत्व निपातनस्यावश्यकत्वा
च्चेति प्राहुः एतेन भाष्यमानः सवर्णोऽन्न गृह्णातीति पक्षे तित्व सामर्थ्यात्स्वरितापत्तिर्दुर्वारेत्यपास्तं
न च लोपागमि रिति विहिते इद्वित्वानुमापत्तिरिति वाच्यं भाविधातुत्वारोपेणेश्विति पि गमेरिड्विति वृद्धा
लोपाभावेनेद्वित्वाभावात् हनो वध लिङि इति वद्विभक्त्यनुत्पत्तेरपत्याऽर्थेनात्वारोपवत्तन्मतेनम
मते धातुत्वारोपमात्रेणश्विति हि भवत्येयारूपपत्तेश्चेत्यपि प्रवदंति अत एव वेत्ति प्रत्याहारान्तर्गतेन यावद्वर्णो
पस्थापकत्वेन सार्थक्यादेवसर्थः एतदेव वक्ष्यति नज्भ्यामिति सूत्रे इत्यादि शापोप्येवमिति अका
रस्याचृत्वेन चित्वात् उक्तरीत्या चकारस्य प्रत्याहारार्थत्वेन शाव कारस्य चित्वाभावाच्चित्स्वरो नेत्यर्थः

32 नन्वस्मिन्सस्रेस्मात्स्मिनाविति सूत्रांतर्गते एव त्संज्ञायां पदच्यो लोचने लोपे ऽनुवंध विनिर्मुक्तादेशाय
ति ईदवीरेतिचेत् न विभक्त्युत्पत्त्यर्थं चत्वारोप वह्नि भक्तित्वारोपेण न विभक्ताविति निषेधात् श्लोपाप्रत्यसा
विशिष्ट त्र्दिशिष्टोपस्थितिरिति गृहाण अस्मिन पक्षे समीप अवयवत्वारोपेण द्वित्वमंसत्वमाहाय
तुभ्रस्य आदेशित्वं णत्वादर्तस्य चेत्वं क्रिदिति सामीप्य मूलकाव्ययवत्वारोपेण बहुव्रीहिः आदिशब्दः पू
र्वसमीपबोधकोस्य शब्दस्य परसमीपबोधकोस्मिन्पक्षे दध्न चश्च कारोज्ञापकोः सत्वमप्युक्तेत्संज्ञाका
र्यं पूर्वस्यैवेति तेन वुञ्छणकेनि विहितकेन द्विर्नवादध्न चश्च कारवैयर्थ्यं इत्समनुवंधा अनेकांता इ
ति पक्ष निगर्वः अत्र पक्षे सत्वस्य णत्वापत्त्याशुच्यतेन गौरवादेकांता अनुवंधा इति पक्ष आह यद्वेति
सर्वत्र सूत्रे उपदेशांसत्वसंभवेपि तत्वेत्संज्ञाप्रयोजनाभावात्कार्यकालत्वाच्च संज्ञायाः कार्यसमका

ले एव संज्ञाप्रवृत्तिरित्यभिप्रेत्याह मास्तु संज्ञान्तर्गतेष्विति पदार्थेष्विति प्रसाध्येष्वित्यर्थः अस्मिन्न् प
क्षे सानुबंधकेनोपस्थापकेन सानुबंधस्योपस्थानमुचितं उपदेशोत्तरकाले संज्ञेति भाष्यस्य उपदेशो
त्तरकालिकोपस्थितिस्तूत्तरकाले इत्यर्थः उपदेशोत्तरकाले फलाभावादित्संज्ञायाः अव्यवहित उत्तरः कालो
बोध्यः परंपरया फलकल्पनापेक्षया कार्यप्रसक्तेरुपदेशांशस्त्वं गौणमाश्रित्येत्संज्ञाप्रवृत्तिरुचिते
त्यभिप्रेत्याह उपदेशे सत्त्वं हीति प्रायोगिकेषु प्रसाध्येषु प्रसाध्यवर्तिनिष्ठं तत्त्व उपदेशांशसत्त्वेऽस्त्यन्वयः आ
श्रीयते आरोप्यते तकाराभावादिति तपर इति बहुव्रीहिणा वर्णस्य समकालसंज्ञात्वात् प्रसाध्ये
तकाराभावान्नोच्चारणे [illegible] न विधानेपि स्वरितत्वापत्तिरित्यर्थः अयमेव पक्षोऽनुगतः दध्नश्चस्य कारवैयर्थ्य
स्य केणोत्वप्रयुक्तदेश्यवशांकाय्या एवाभावात् एकांतादृसेवमां प्यमिति तस्य लोप इति सूत्रे भाष्यो

33 त्वेऽथ अत्र पक्षे इञ्जायु पस्थितावित्संज्ञालोपौ भवन्तीति कालविलंबे प्रमाणाभावात् तेन ञकपरेत्सं
ज्ञक इकारः प्रत्ययो भवती त्यादिक्रमेण सूत्रार्थः शवादेरिञ्जीसादावनुवादे ञकारेत्संज्ञके इकारे इ
त्यादिरित्सौष्ठ्यं [illegible] वन्नतिष्ठति सूत्रे सुट्मेतत् आटश्चे सस्य टकारेत्संज्ञकाकारादचि वृद्धिः सर्वः
अन्यथा सूत्रे आटः सत्वे पिनाञ्चपरत्वं नेष्यते च सूत्रे वृद्धिः यत्र यत्र योगे इष्यते वृद्धिस्तत्र ना टेरस्यानु
पपत्तात् कदापि प्रयोगाटो सत्वाद्भूतपूर्वगतिरप्य शक्या उपलक्षणत्वे न व्याख्याने गौरवं मिसेकां
ता अनुबधाङ्गति पक्षनिघर्षः स्त्रियामिति दिवतुदिसापि बोध्यं ज्ञापकानाश्रयणेन त्वा घवाद्राह
ह्वेह्वयतीति ह्वे ह्वे सति सौलुकि ह्रस्वसवर्णदीर्घयोः प्राप्तौ ह्रस्वस्यानपुंसकार्थापेक्षत्वेऽप्यर्थे ज्ञातव हि
रंगत्वानाश्रयणाच्चा [illegible] ऽन्तरंगत्वाद्ध्रस्वे ततः सवर्णदीर्घ्य एकादेशस्य पूर्वान्तवत्त्वात् धिसंज्ञक

पूर्वोकारसंबंद्धित्वा ह्रस्वस्य भिन्नलक्ष्यसंबंधित्वात्पुनः प्रवृत्तावुरिति सिद्धमिति भावः एतेन दीर्घस्य श
ब्दांतरभासमानःसत्वे नांतरंगत्वाद्ध्रस्वे सति सवर्णदीर्घ उरिति रूपासिद्धिरिति परास्तं अत एव समाहार
द्वंद्वाश्रयणादेव इति सूत्रे इति प्रयस्यागतस्तत्र अनुणा पूर्वमुकारस्य दीर्घोकारे कृते तस्याऽभीयासि
द्धत्वेन हकारस्य लघुपूर्वत्वे न दत्स्यपि लघुपूर्वादिति प्राप्तायादेशवारणाय गुणे कृते ऊदादेशो यथा
स्यादित्येवमर्थो विकृतनिर्देशः ऊदादेशस्यासिद्धत्वे णोकारस्य गुरुत्वान्नाप्य भाष्यकारेणोकारांतरं
प्रश्लिष्य तत्सामर्थ्यादसिद्धत्वं बाधित्वाऽयादेशाभावे सिद्धे विकृतनिर्देशः अस्याख्यानइत्यर्थः विषय
निर्देशार्थे विकृतनिर्देशः तेन नुनुगुहनुरिति सिध्यतीत्यलमत्र नन्विकउणित्यादिसूत्रपठितह्रस्वानां सं
ज्ञित्वात्कः सर्वलोइस्मादावकृपदेन ह्रस्वानामेवोपस्थितिः स्यान्न दीर्घाणां नच ह्रस्वसंज्ञित्वेप्यकृ

34 पदोपस्थितह्रस्वे दीर्घोपस्थितिरणुदित्सूत्रादिति वाच्यं प्रत्यायकत्वप्रतीयमानत्वयोरेकस्यैकदा
ऽसंभवात् न च दीपवत्स्वपरोभयप्रकाशकत्वं संभवति शब्दस्य स्वप्रकाशत्वाभावात् तस्मादुच्चा
रितस्यैव शब्दस्य परप्रत्यायकत्वमित्यभिप्रायेणाह नन्वेवमपीति नन्वेवं रहसि पुस्तकमीक्षणे बो
धानुपपत्तिरिति वाचकशब्दज्ञानमेव बोधे कारणं न तु उच्चारितत्वमपीति चेत् अत्राहुः रहस्यपि स्वी
यसूक्ष्मोच्चारणसत्वात् ऊचे चेति सुजेप्रकरणादिनाऽस्य विशेषबोधेपि संपाठमात्रं गम्यत इति भा
ष्याविरोधेन शब्दज्ञानमात्रस्यार्थप्रत्यायकत्वात् च यद्वा लिप्यैरेव चेष्टादिवत्संकेतेनार्थबोधिका
अत एव बालानां लिप्यां शब्दत्वभ्रमः यद्वा अंतःकरणेहावात्मत्वप्रत्ययस्य भ्रमत्वं जानतामपि पं
डितानामनादिसिद्धारोपेणैव व्यवहारस्तथा लिप्यावनादिशब्दतादात्म्याध्यासाद्बोधकत्वं लिपो

शब्दत्वबाधज्ञानकालेपि अतएव पुस्तकेच कारस्त्रुटितो नकारोऽधिक इति व्यवहारः पंडितानां सर्वो
णां चेति भावः अणुदित्सूत्रं तु सवर्णपदार्थज्ञानोत्तरकाले एव ग्राहकं न त्वइउणित्युपदेशे एवेत्यपि बोध्यं किं
च व्यक्तिपक्षे ग्रहणकसूत्रारंभात्स्वरूपेणोच्चारितेऽस्य ग्राविस्यादौ सवर्णग्रहणानापत्ताऽणुदित्सूत्रसा
मर्थ्यादेणादेशो ग्राहक इत्यर्थ इति न दोष इति चेन्न अनणत्वमनुपदेशस्य यत्र नास्ति अकः अच्वीसा
दौ ककारादनुबंधोच्चारणास्य साहारस्यत्वमणत्वं च उच्चारणं चास्तीति न तत्र सूत्रं सार्थकमित्यभि
प्रायेणाह अकारोष्टादशानामिति ग्राहक इत्यिति अणुदित्सूत्रारंभसामर्थ्यात्तद्वदित्यर्थः ग्राहक इति
शक्तोपस्थापक इत्यर्थः इत्युक्तेरिति इकारादिषाप्यरसमाम्नायिके पुसंकेतितत्वात्तद्वदित्यर्थः कथं
ग्राह्याग्राह्य इति तेषु शक्तिग्रहाभावादित्यर्थः नन्वकारवदिकारादयोप्यणपरेनोपस्थिता अणुदित्सूत्रे

35 णदीर्घादिग्राहकाः संतु ग्राह्यत्वं ग्राहकत्वं च द्वीयमायादत आह नहीति अयमर्थः पराप्रकाश्यत्वा
त्तेजसो ज्ञानमानमात्रेण स्वपरप्रकाशकत्वं युक्तं शब्दस्तु स्वतोऽप्रकाशमानः परप्रकाश्यः कथमन्यं प्र
काशयेत् विरोधात् यद्यपि सर्वेऽपि शब्दाः उच्चारणप्रकाशिता एवार्थप्रत्याययन्ति तथापि संबंधात्सप्र
काशकः सच संबंधः शक्तिलक्षणा च संबंधांतरेणोपस्थितेर्वाक्यार्थबोधानंगत्वात् आश्रयत्वेनो
पस्थिताकाशस्यापि शाब्दबोधेन्वयप्रतियोगित्वापत्तेः तथा चेकारादीनां ह्रस्वानामकारेण शक्त्यावो
धनाद्दीर्घकारादीनामबोधनां नेषां वाक्यार्थान्वयानापत्तिस्तथापि स्वत उच्चारितेषु प्रत्याहाराद्यवर्णे
षु चरितार्थमनुच्चरितेषु शक्तिग्रहणाय नान्येन मित्यभिप्रायेणाह नन्वकुशब्देनेति अन्वियंत्विति
पदार्थत्वादित्यर्थः नन्वनुकरणेषु सादृश्यादिसंबंधेनोपस्थितस्यापि शाब्दबोधविषयत्ववदत्रापि

दीर्घाणां वाक्यार्थान्वयित्वं स्यादत आह ननु तेपि स्वार्थेयिति यद्धर्मविशिष्टे शक्तिग्रहस्तद्धर्मप्रकारि
काय स्थितिः कारणमिति द्वत्वेनोपस्थित्यभावाद्दिकारादेः शक्तिग्रहासंभवादिति यावत् उपस्थितिरि
ह पदार्थज्ञानं न किंतु न दन्वयबोधः स्वार्थान्वयबोधजनकाः नेत्यर्थः इत्युक्तमिति नहीत्यादिनापू
र्वं अतएव अनुच्चारणादेव कं वेत्तीति ननु कत्वेदत्वयोरर्थप्रतीतिजनकतानवच्छेद
कत्वाद्दचमित्युक्तेस्तद्विशेषाप्रतीतेश्चार्थप्रतीतिसंभावनाया असंभवात्कथं संप्रतिरिति चेत् न य
द्रा संकेतवशात्प्रकरणादिना वा वास्तोष्पते इत्यादौ विशेषस्य वृ पदेनोपस्थितिस्तदा तदर्थस्य
न वेदनकर्मत्वेनान्वय इति तात्पर्यात् एवं च इग्यादि यदोत्तरषष्ठ्याः स्वप्रकृत्यर्थान्वितस्वार्थबोध
कत्वेन दीर्घादिस्थानित्वबोधनासंभव इति भावः प्रत्याहारेति अकः अचीत्यादिसंज्ञया प्रत्यायन

36 मिकारादीनांतत्रतेदीर्घादीनां ग्रहणं न स्यादित्यर्थः अनुपदेशात् दीर्घाणामनुच्चारणात् उच्चार्यमा
णेति प्रतीतस्य प्रत्यायकत्वाभावादित्यर्थः शब्दस्यावचनमिति प्रतीयमानशब्देन अन्यस्याप्रत्या
यनमित्यर्थः लक्षणानिरूढेति नन्वेवं पयस्विनी पूजयतीत्यादौ पयसः पूजनकर्मत्वान्वयाभावा
यप्रत्ययानां प्रकृति जन्य बोधविशेष्य एवान्वयसमर्थकत्वमिति नियमात्प्रकृते दीर्घाणामेव स्था
नित्वेन ह्रस्वेषु प्रयाणे दुर्लभः एकयाप्यप्या उभयगतस्थानित्व बोधनासंभवादित्याशयेन शंकते
नन्वेवमिक इति ग्रहणमिति स्थानित्वेनग्रहणं नेत्यर्थः यथाश्रुतं तु न युक्तं ह्रस्वग्रहणेन दी
र्घग्रहणात् विरोधादिति शाकलस्ययोर्विभिन्नपर्थे न्वयबोधविरोधादित्यर्थः सतितात्प
र्येइति अयंभावः अजा विधानेरूनचैत्रा विसाहै यथा संख्यान्वये द्वंद्वसाधुत्व वारणाय द्वंद्वा

र्थस्यैकधर्मावच्छिन्नेऽन्वयस्याघंतौ रकीत्ति सूत्रभाष्योक्तस्यावश्यकत्वेन पररीत्या नीरतीरयोर
न्वयानुपपत्त्याहत्तिद्वयविरोधेपि गंगात्वेन तीरनीरयोरुपस्थित्या एकधर्मावच्छिन्नेऽन्वयसंभवे
न युगपत् वृत्तिद्वयविरोधाभावात् युगपद्वृत्तिद्वयस्याविरुद्धत्वे लिंगमप्याह इहचेति स्यादेत
त् अन्वयानुपपत्तिज्ञानपूर्वकं शाक्यत्वेन गृहीतार्थसंबंधज्ञानेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्ष
णाशक्तिसंस्कारश्चेद्दृशास्यसे जन्मांतरीणोपि तत्र गंगापदं नीरलक्षकं वाघोषादिपदं मकरादि
लक्षकं वेत्युभयथाप्यन्वयानुपपत्तिपरिहारात्कुत्र पदे लक्षणेति विनिगमनाविरहात्तात्पर्यानुप
पत्तिरेव लक्षणाबीजं तत्र शाब्दार्थोपस्थितौ तद्विषयकान्वयबोधे जाते तस्मिन् वक्तृतात्पर्यज्ञा
नेन तात्पर्याविषयत्वे गृहीते अप्रामाण्यग्रहे सति लाक्षणिकार्थबोधः शाक्यार्थान्वयबाधं विना त

37 त्रतात्पर्यविषयत्वग्रहासंभवात् संसर्गविषयकज्ञानस्यैवान्वयबोधत्वात् संबंधज्ञानं च द्विधा
तीरसंबंधिप्रवाहबोधकमिदमिति गंगापदशक्यप्रवाहसंबंधितीरमिति वा लक्षणे नानावक
वचने एवं च लक्ष्यतावच्छेदकेपि लक्षणा केचित्तु संबंध एव लक्षणा संयोगसंयुक्तवृत्तित्वरूपसं
बंधद्वयरूपा एका लक्षणा लक्षणे एकवचनं जातौ विशेषणे संबंधारोपो वेति सर्वथा लक्ष्यतावच्छेद
केऽलक्षणास्तीत्याहुः अन्ये तु उभाभ्यामनारोपितसंबंधस्यैकस्यासंभवाद्विशेष्यगतसंबंधज्ञानस्य ल
क्ष्यतावच्छेदकप्रकारकलक्ष्यबुद्धित्वं कार्यतावच्छेदकमित्यलक्ष्यस्यैव न तस्याभानमित्याहुः प्रकृते ता
त्पर्यगमकलिंगज्ञानेन शाब्दार्थबाधे तात्पर्यविषयत्वग्रहेण प्रामाण्यग्रहेण लक्ष्यासंस्कारक
त्वनिश्चये सति लक्षणया तद्वाक्यवाच्यदीर्घादीनामेव स्थानित्वबोधनात् कृत्वा नांपलादिकार्यं तु

र्णभेदेमेचेत्स्यत आह अच्छावशादिति ऋदूतोरपि अपिशब्दात् ऋकाराद्यः अविशेषादिति दीर्घेष्विषु
अणुदित्सूत्रबलात्सवर्णत्वाद्ग्राह्यत्वच ह्रस्वानामपि ह्रस्वसवर्णत्वाविशेषादित्यर्थः एतेन ह्रस्वेषु
ह्रस्ववाच्यत्वं कथमिति परास्तं सवर्णसंज्ञा च ह्रस्वत्वभेदे नोच्चारणभेदे न वा भेद इति भट्टाः अभेदेन
संबंधरूपेषामाशयः जिधातोः प्रकृष्टजये लक्षणा संबंधश्चाभेद एवेति पक्षधरमिश्राः अभेदस्यैव
ष्टप्रयोजकत्वं नास्ति लक्षणाप्रयोजकत्वं त्वस्त्येवेति तेषामाशयः सर्वमिदं स्ववाच्यतापिपरमिति व
दद्भिर्ध्वनितमिति प्राहुः अम्प्रदेतदिति एतज्जातीयकमन्यदपि बोध्यमित्यर्थः तेन द्विरेफपदेऽपि द्विरे
फपदवाच्यभ्रमरपदवाच्ये लक्षणा विभक्त्यर्थान्वयानुरोधात् यत्तु रेफद्वयवत्वेन द्विरेफपदं भ्रमर
पदं बोधयति तस्य भंगे लक्षणा विभक्त्यर्थान्वये प्रकृतिप्रयोज्योपपत्तिरिति हेतुरिति तन्न उच्चरितस्ये

38 वक्रस्थायकत्वेन भ्रमरपदस्यानुच्चारितत्वेन ततो बोधानुपपत्तेः अन्ये तु तत्र द्विरेफपदमेव भृंगं बोध
यति रथंतरादिपदवदवयवार्थाप्रतीतेः अत एव कोशे भृंगपर्यायेषु द्विरेफपदमुक्तं शुक्लादिपदाना
मपि लुगनुशासनेन गुणिषु शक्तिरेव बोध्यते न हि लाक्षणिकार्थानुवादित्वं कोशानुशासनयोर्युक्तं
शक्तिग्राहकतायाः अभियुक्तोक्त्याभावस्संमतत्वात् न च शक्तौ संबंधकल्पनागौरवात् संबंधाकल्पना
ल्लक्षणायां लाघवमिति वाच्यं बाधाद्यनुसंधानपूर्वकत्वाल्लक्षणायामेव गुरुत्वात् निरूढलक्षणा
नुशासनयन्ति भिन्नैवेति प्राहुः अयमत्र निष्कर्षः ध्वनिपक्षे प्रत्याहारादिवर्णेषु प्रत्याहाराणक सूत्रेणाष्टा
दशानां ग्रहणसिद्धेः द्वितीयादिवर्णे सजातीयवर्णसंग्रहार्थं निर्देशो हि तालक्षणा द्वितीयादीनामनु
च्चारितत्वात् सा च लक्ष्यतावच्छेदकसाधारण्येपि द्वितीयादिसजातीयवर्णबोधे पर्यवस्यति एवं च

येति षष्ठ्यंतात्समुदायवलात्रयमर्थो लभ्यत इत्याहुः विधायकत्वेऽनेक विधिवैयर्थ्यं स्यादित्यर्थः
तृतीयमाह्निकं नधातुलोप मरीमजइत्यत्र मजे र्हि द्विः रगिति रकप्रत्यये इत्लो लोपेरोरीति लोपे
दृलोपेति दीर्घः इत्यत्र क्ष्णत्वेति इकु शब्दमुच्चार्य विहितत्वाभावादित्यर्थः शब्दाधिकारप
क्षे गौरवादाह अत्रत्वेति आर्द्धेति यक आर्धधातुकत्वात्तन्निमित्तकोऽयमित्यर्थः भावः उपेद्ध इति
उपपूर्वादिंधेः क्तः अनिदितामितिन लोपः एकाच इतीण्निषेधः साधनेन साधनाभिधायिप्रत्य
येन ननु पूर्वं साधनयोगेपि नलोपात्प्राक् गुणनिषेधाप्राप्तेः रूपं सिध्यतीत्यत आह नलोपांतरंगइ
ति पदद्वयाश्रयत्वात्गुणस्येति भावः गुणोंतरंगइति पदद्वयाश्रयत्वेपि द्योत्यार्थविशिष्टक्रियायाः
साधनसंबंधाद्विशेषणीभूतार्थद्योतकसंबंधोंतरंगइति प्रादिसंबंधेन लोपाप्राप्तेः क्नमस्ययस्या

कात्वे १

न्निष्पन्नत्वान्नलोपाभावाच्च निषेधाप्राप्तेर्गुणोंतरंगइत्यर्थः परिभाषार्थस्तु अंतर्मध्येवहिर्भू
३९ तानिमित्तकशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यंगानि निमित्तानि यस्य तदंतरंगं एवंतदीय
३९ निमित्तसमुदायाद्बहिरंगं अत्रांगशब्देन शब्दरूपंनिमित्तं गृह्यते शब्दशास्त्रेतस्यप्राधान्यात् ते
नार्थनिमित्तकस्यनवहिरंगत्वं अतएवनतिसृतिनिषेधश्चरितार्थः अन्यथास्त्रीत्वनिमित्तकति
सृयेस्यांतरंगत्वात्त्रयादेशेनलः स्थानिवत्वेनत्रिशब्दत्वात्तिसृआदेशस्याप्राप्त्यवसरत्वात् अप्रवृत्तौ
नितिसृतिनिषेधवैयर्थ्यंस्पष्टमेव अतएवत्रयादेशेत्वंतस्यप्रतिषेधइति स्थानिवत्सूत्रस्यभा
ष्यवार्त्तिकादिसंगच्छते अंगशब्देन सप्तम्यार्थं न तयोपात्तं शब्दरूपंनिमित्तमेव गृह्यतइतियेन ३९
विधिरितिसूत्रेस्थानप्रसंगेस्पष्टं एतेन संज्ञाकृतमपितदितिपरास्तं कृत्तिनुग्ग्रहणात्तद्ज्ञा

पकात् अन्यथात्रग्रहणमित्यपादोपदत्वनिमित्तकनलोपस्य वहिरंगतयाऽसिद्धत्वान्नुगभा
वेतद्वैयर्थ्यस्यप्रमेयभ्यामः पदसंज्ञानिमित्तत्वेपिनलोपस्यतन्निमित्तकत्वाभावात् परंमरमा(
निमित्तत्वमादायवहिरंगत्वाश्रयणे तुनमानं अंतरंगे कर्तव्ये जाते तत्कालप्राप्तिकं च वहिरंग
मसिद्धमित्यर्थः असिद्धवदिति असिद्धत्वमित्यर्थः परस्य विभक्त्यान्वाख्याने एवैतत् अन्यथा समा
नकालिकत्वाभावात्परिभाषाविषय एवत्रांतरंगेति नस्यात् इति केचित् यत्रांतरंगेति अचो
रिति द्वित्वं तु न विवक्षितं एतज्ज्ञापकत्वासंभवान्नुग्रहस्य नहिइत्वस्यापितीत्सन्नद्व्योराश्रयणं
ज्ञापयिष्यतइति षत्वग्रहणेनेतिशेषः तथाहि कोसिचत्कोस्यस्यादौपदद्वयसंबंधिवर्णद्वया
पेक्षत्वेन वहिरंगस्यैवादेशस्यासिद्धत्वेन षत्वाभावप्राप्तेः किं तेन अच आनंतर्येति निष्ठत्वं षष्ठ्यर्थः

अनुनिष्क्रमानन्तर्यं यत्राश्रीयते तत्रायं निषेधइत्यर्थः इणः परस्येति यद्यपि ङ्णिहलोप्यंतर्भू
४० तास्तथाप्येचोप्यंतर्भूताः संस्येवेतिभावः अतएव ग्रामणिकुलमित्यादौ ह्रस्वस्येतितुगसिद्धपरिभा
50 षयावारितः छन्मेजंत सूत्रे भाष्येइत्याहुः तस्मादिसस्य पंचम्यंतार्थे अव्यवहिते इत्यर्थस्ततेन नध
र्मिग्राहकमान विरोधः इदं प्राचामनुरोधेन वस्तुतस्तु तुगग्रहणं ज्ञापकं अन्यथाऽधीत्यमेत्यादौ
समासोत्तरं ल्यप् प्रवृत्त्या पूर्वं समासे जाते तत्र संहितायां नित्यत्वात्तस्य तुक्यपि पर्यंतमप्यसंहितया
वस्थानासंभवेनैकादेशात्पूर्वं तुगपेक्षया परद्वयसंबंधिवर्णद्वयापेक्षैकादेशस्य बहिरंगतयाऽसि
द्धत्वेन तद्वैयर्थ्यस्य स्पष्टमेव अचः अम्यानंतर्यनिमित्तके अंतरंगे कर्तव्ये जातस्य बहिरंगस्य बहिष्टु ४०
मत्क्लृप्तिः बहिः पदेन बहिरंगं तस्य भावो बहिरंगत्वं तत्प्रयुक्ता असिद्धत्वस्य न तत्र क्लृप्तिर्न प्राप्तिरिति

असिद्धं बहिरंगमित्युक्तो नाजानंतर्ये इति वक्ष्यामीति भाष्योक्त्या तत्र तस्यांतरंगे इत्यस्यानुवृत्तिः
सूचिता तेन पचावेदमित्यत्र न दोषः अंतरंगस्येतरेत्यस्यास्य स्थानिकत्वेप्यानंतर्यनिमित्तकत्वा
भावान्न दोषः जातस्य बहिरंगस्येत्युक्त्या अयजेन्द्रं धियतीत्यादौ बहिरंगदीर्घगुणादेरसिद्धत्वे अ
तएव ह्रूडी शीनामागुणः सवर्णदीर्घत्वात् शचङः स्यांतरंगत्वलक्षणत्वादित्यादि संगच्छते अतए
वोमाङोश्चेत्याङ्ग्रहणं चरितार्थं तद्धि शिव आ इहि इति स्थिते परमपि सवर्णदीर्घं बाधित्वा
धातूपसर्गकार्यत्वेनांतरंगत्वाद्गुणे ह्यद्धि बाधनार्थं षत्वग्रहणं तु न ज्ञापकं कोस्पसाराविणः पू
र्वपदसंबंधित्वेन षत्वस्यापि परद्वयसंबंधिवर्णद्वयापेक्षत्वेन उभयोः समत्वात् एकादेशस्य
परादित्वेन ओसिचदित्यस्य पदत्वेन पदादित्वाभावान्न धातुलोप मरीमृजइत्यत्र मृजेर्वृद्धिः रगि

वान्नसात्पदाद्योरित्यनेन निषेधः त्रैपादिके तरंगे कार्यकालपक्षेपि वहिरंगपरिभाषाया अप्रवृत्ते
५१ र्विसर्जनीयस्य सूत्रे भाष्ये स्पष्टत्वाच्च नचास्य पूरिसपत्रयणि कृते तु ढोऽसिद्धत्वाद्दस्त्रिलोपायत्तिरिति
51 वाच्यं अचोन्यानंतर्यनिमित्तके अंतरंगे कर्त्तव्ये कृते च तस्मिन्नयदंतरंगं प्राप्नोति तत्र च कर्त्तव्ये नासि
द्धत्वमित्यस्यैनारोबात् वृद्ध्विवरणकारास्य सिद्धपरिभाषायास्तु प्रग्रहणेनानित्यत्वमेव बोध्यते ना
जानंतर्य इति तु नास्त्येव अत एव हलि तु ग्रहणं चरितार्थं अन्यथा सूत्रे हभ्यामित्यादौ वहिर्भूतभ्या
म्निमित्तकपदत्वाश्रयेण वहिरंगतया नलोपासिद्धत्वेन सिद्धे तद्वैयर्थ्यं स्पष्टमेव मम तु नुकि अजानं
तर्यसत्त्वान्न दोषः अत एव ग्रामणि पुत्र इत्यत्र कोः ह्रस्वोऽङिति ह्रस्वे कृते तु कमाशंक्य ह्रस्वस्य वहि ५१
रंगासिद्धत्वेन समाहितं भाष्ये ह्रस्वस्यपितीति सूत्रे तदपि संगच्छते नाजानंतर्यइत्यस्य सत्वे तु तत्रैत

त्मद्दस्यात कृष्णासंगतिः स्पष्टैव अत एवैषा विप्रतिषेधसूत्रादन्यत्र भाष्येन क्वाप्युक्ता अंतरंगपरिभा
षामुक्त्वा वकृप्रयोजनेनैषा कर्त्तव्या प्रतिविधेयं दोषेष्विसुक्तं न त्वेषेति प्राकुरितिदिक् निर्देशादिति इदं
च यत्नोपार्थमावश्यकं अन्यथा वर्णमात्राश्रयत्वादंतरंगे यत्नोपे कर्त्तव्ये बहिरंगस्य षुको असिद्धत्वा
त्सन स्यात् गौरवमिति अत एव प्रमाणाभावाद्वृत्तीयपक्षानुपन्यास इति कैयटस्य नन्यूनता न
लभ्येतेति प्रत्यासक्तिन्यत्वेपि लाघवाद्दृकु ब्रीहिरेव साधुरिति तात्पर्यं विभज्यान्वाख्यानपक्षेपि
श्रुतवर्णक्रमेण संस्कारे भागेन गुणः स्यादत आह उपेति उत्सर्गबाधत इति तद्बीजं तु मानांतरबो
धितप्राबल्यं वा अचरितार्थत्वं वा आद्ये उदाहरणे न धात्विति द्वितीये अरम्भस्तादिति आद्यस्य
वर्णीयत्वं च निषेधाश्च वर्णीयां सोभवंतीति न्यायात् अत्र च विधुन्मूलकत्वं बीजं अस्त्विधात्विति

स्यांतरइति वर्णस्य स्थानित्वेन निर्देशादित्यर्थः नन्वहादेशस्य निरवकाशत्वेन ततः पूर्वं नांतादेशप्रवृ
४२ त्तिरिति चेन्न जश्शसोरित्यादौ समानकालिकमात्रांतादेशबाधेन सावकाशत्वमित्यभिमानात् वस्तु
तस्तु भत्तिस्ते क्लेण त्वेस्य भेदाद्भ्यस्तसंज्ञैकवाक्यतापन्नादभ्यस्तादित्यस्य रधतीत्येतद्विषयकत्वाच
रितार्थत्वान्नांतादेशस्यात्र पूर्वं प्रवृत्तिरिति चिंत्योयं कौस्तुभः ॥ जुस्तएवारुचेर्वाह किंचेति ज्ञापयितु
मिति तद्धि स्थानिवदादिभ्यः कृतदीर्घेभ्यः प्रत्ययोत्पत्त्यर्थं अन्यथांतरं गत्वाद्दीर्घत्वे तत एव प्रत्ययप्रा
प्यातदर्थं स्यात् तत्र हि भाविनामाद्दिहद्यासवर्णोत्त्वविनाशः स्पष्ट एव नचात्रैकादेशप्रवृत्तिस
मये हृद्यभाषा एकादेशे कृते आदिवृद्धः आप्नावपि तन्निमित्तविनाशाभावइति वाच्यं तद्वारेव नि ४२
मित्तविनाशसत्वेनाश्रुतेः नचसोऽथितो वहिरंगतया सिद्धत्वान्न निमित्तविनाश इति वाच्यं

समर्थग्रहणेनैतद्विषये तस्या अप्रवृत्तेरपि ज्ञापनात् यत्तु समर्थग्रहणेनांतरंगपरिभाषाया अ
नित्यत्वमेव ज्ञाप्यत इति तन्न असिद्धपरिभाषया समकालप्राप्तबहिरंगस्य पूर्वंजातबहिरंगस्य चां
तरंगे कर्तव्ये असिद्धत्वे बोध्यते न तु जाते तरंगे तस्य तत्त्वं बोध्यते मानाभावात्फलाभावाच्च एवं च स
स्थितान्हावेकादेशस्य परिभाषासाध्यत्वाभावेन तदनित्यत्वज्ञापनासंभवात् एतदसहत्वं च निमित्त
विनाशसंभावनापि निमित्तं अत एव गोमहद्दीसादौरलुप्तादिलोपेन अन्यथा हल्ङ्यादिलोप
काले सामासिकलुवेलुवभावस्यालुक्तरं चाहार्यभावादप्राप्तलोपस्यैवापत्तेः अस्ति चात्रापि यदि
लोपेन स्यात्तर्हि लुक् स्यादेवेति संभावना अंतरंगानपि विधीन् निसादेरप्यस्यामेवांतर्भावः अह्लो
पेन इति सूपरकरणमस्या अनित्यत्वे लिंगं तद्धि आन इत्याद्यैलोपवारणाय अन्यथा दीर्घाभावे लो

पसंभावनयैतस्यपरिभाषायावत्वाद्दीर्घमाप्नोतीत्येत्यर्थमिसाधुः चेयदृष्टान्तहातः व्यूहोविशिष्टस्तर्कः निमि
४२ त्तकारणनाशेपिकार्यस्थितिरूपायैरिसर्थमभिप्रेतितेनपयुषइत्यादावंतरंगत्वात्पूर्वं कृतोपीउगागमो
43 निवर्त्ततइत्याह जग्मुषइति केचित्तुजग्मुषइत्यादौपदावधिकेव्याख्यानेजग्म्वस् असितिस्थिते
इट्संप्रसारणयोः प्राप्तौ प्रतिपदविधित्वात्पूर्वंसंप्रसारणेवलादित्वाभावादिटः प्राप्तिरेवनेत्याहुः के
चित्त्वियंनास्त्येव अतएवचावितिसूत्रेचोप्रसंगप्रतिषेधइतिवार्त्तिकमारब्धंभाष्यकृताचनप्रसारणा
त्तं प्रत्संगमंतरंगं एतत्सत्वेतद्व्यर्थमेव अतएवच्छ्वोरितिसूत्रेवरयमत्रतुगभावार्थोयत्नः कार्येतरं ४३
गत्वात्तुकप्राप्नोतीतिभाष्येउक्तं एतत्सत्वेतुकोप्राप्त्यायत्नावश्यकत्वकथनमसंगतंस्यादित्याहुः ।
भाष्येक्वाप्यनुक्तत्वादियंनास्त्येवेत्यन्ये साधुरितिनचवकुब्रीह्यभावेपिनदोषः अचःपरस्मिन्निति

रिल्लोपस्य स्थानिवद्भावादिति शत यथा स्थानिनि सति निषेधो न प्रवर्त्तते एवमादेशेऽपि न स्यादिति चेन्न
पूर्वस्यात्र शब्देनाश्रयणाभावात् च: परस्मिन्निस्यस्याप्रवृत्तेः। प्रसासन्नत्वादुपस्थितत्वाच्च कनिमित्त
त्वलाभेप्यत्रपस्येशाब्दे मे कनिमित्तत्वं न भ्यत इति भावः गुणइति लघूपधगुणइत्यर्थः इकूपदमि
ति अयंभावः प्रतिलक्ष्यलक्षणभेदा — नन्तक्ष्वस्य संस्कारवेषु सार्वधातुकार्धधातुकयोरित्यादीना
मवांतरवाक्यार्थेषु इकूपरिभाषया अभावः कल्प्यते नधात्विसादेरयमर्थः एतेषु निमित्तेषु सत्सु यं अर्वांतरवाक्यार्थे
त्रगुणवृद्धी विधीयेते तत्रेकूपदं नेत्यर्थः तेन व्यंजनानां गुणः स्यादिति। भिन्नोम इडूति इकुतिचेस
स्यादृतरेण साकांक्षेति भेदे· विभागे· साकांक्षाः अवयवाः पदानि यत्र परेति वा क्वप घट कपदापेक्ष
या अन्यानाकांक्षाः शब्दा यत्र कर्मप्रधानं क्रियाप्रधाने गुणवत् विशेषणवत् एकार्थे एकवि

शेष्यकमतीतिजनकं अतएव नञर्थाभावस्य क्रियान्वयादेव क्रियाप्रतियोगिकाभावस्यैवमती
४४ तेरितिभावः अन्यथा नामार्थान्वयेपि क्रियायामभावस्यान्वयाद्यथाश्रुतेः संगतेः नामार्थेनान्व
५५ याभावादितियावत्· कश्चिदिति युस्मदस्मदर्थसत्वेपि क्रियासामानाधिकरण्याभावस्य पुरुषाव्यवस्था
स्यादित्यर्थः ननु एकत्र युष्मदर्थस्य प्रकारत्वमेकत्र संबंधस्येति विशेषोस्त्वेवेत्यत आह नञर्थ
मतीति· नञर्थप्रतीतिविशेषणत्वेपि क्रियान्वयस्यानुपपादनादित्यर्थः तदाह विरहस्येति वचनाव्य
वस्थामप्याह एवमिति· विस्तारइति· एतत्प्रतीत्युपपादनं करिष्यते नञ्सूत्रे सिद्धांतइति एतदुपपा
दयिष्यते नञ्सूत्रे फलितइति गुणं हि षष्ठीकर्तृकसमासाभावबोधे गुणीभूतकर्तृभावः फलितइत्यर्थः ४४
यथा आघारेति आघारमाघारयति क्रतुमाघारमाघारयतीत्यत्र अग्निहोत्रं जुहोतिरग्निहो

त्रं जुहोतीत्यत्र च ऋजुत्वविशिष्टा धारस्यदधिकरणमाग्निहोत्रस्य चमतीतावष्ण्वो धाराग्निहोत्र
योर्वाक्यांतरेणविधानसिद्धेः ऋजुत्वेकरणे च गुणे पर्यवसानवदित्यर्थः न्यायसाम्यादिति अर्थनिर्णी
यकतासर्वपरूपुन्यायसाम्यादित्यर्थः गोचरतेति वाक्यार्थक्रियाविषयकत्वमित्यर्थः षोडशीति
अतिरात्रेषोडशिनंगृह्णातिनातिरात्रेषोडशिनंगृह्णातीत्यत्रेव नोनावेति वकाराद्विधीयमानस्या
र्धधातुकनिमित्तकत्वाभावान्न धातुलोप इत्यस्याप्राप्तिरित्यर्थः इतिवदन्वितिति यङः तस्यरूपंइत्यास्या
ह्ः अवयवेतिपूर्वोक्तरीत्येति भावः उभयथास्यानिवत्वानैमित्तिकत्वरूपप्रकारद्वयेन. यङः ते आ
ह यद्विति ति भिद्धिम ज्योरिति पचेरप्युपलक्षणं पृथगद्रोपमिति योगविभागेनेति शेषः स्तुग्वा
धनादिति आर्धधातुके इत्यस्य वा अंगास्थिमप्रत्यये इत्यस्य वा विषयसप्तमीत्वमाश्रित्य योगविभा

गसामर्थ्योच्छुग्वाधनादित्यर्थः एतेनानुल्यकाल्लत्वात्कथं बाधकतेत्यपास्तं अतएवाष्टोपस्यस्या
८५ निवत्वे किं सत्रे ऽलोति यङः तयङ् लुगंतयोः समानमितिसूत्रं व्यर्थमित्यर्थः नस्यातामिति अच्प्रत्य
45 यनिमित्ताविस्यर्थः उभयुगोः स्यान्निवत्वात् प्रत्ययसंज्ञः संभाव्यमानप्रत्ययसंज्ञावान् नत्वक्य
मिति समुदायवर्तित्वात्प्रत्ययत्वस्येत्यर्थः तस्मिन् यकारे अदृष्टमपीति एवं च तन्निमित्तकावियुड्
वङावपि दुर्लभाविति चेन्न यङ्साद्यसिद्धिरिति भावः दिगिति दिगर्थस्तु संभाव्यमानधर्मान्नतिदेशे
नवरेयग्रहणवैयर्थ्यं तु न शंक्यं यातिरित्यादावाष्टोपाभावाद्रूपासिद्धिरिति संभाव्यमानधर्मातिदे
शोवश्याभ्युपेय इति एवं च ज्ञापनफलं यातिरित्यादिसिद्धिः अंतरंगानपीति अत्र ज्ञापकं मन्त्वयोत्त ८५
रपदयोश्चेति सूत्रं तथा हि त्वत्कृतमित्यादौ लुगपेक्षयांतरंगत्वाद्विभक्तिनिमित्तके न्नत्वमावे कवचन

इत्यनेनसिद्धे इदं सार्थं सत् ज्ञापकं नन्वंतरंगानपीत्यस्याभावेन वपुत्रस्त्वसुत्रइत्याद्दौतवममादे
रेंतरंगत्वात् आमस्य धबाधनार्थं तदावश्यकं न चाहंमम ब्रूहि इत्यनेन अनुगुन्तरं न वाधमाभिर्निह्नुत्तिर्वे
त्तिवाच्यं एवं तर्हि त्वममोरध्यै आस्या सत्रसार्थक्यात् ज्ञापकत्वासंभवात् वक्तव्यताकृते त्वे यमित
घमि ६ द्भिन्नैवेति न दोषः अंतरंगत्वेन निष्पन्नत्वाद्बलाबलादेशानां नत्वनुमतेति निषेधोपि नास्तीति
चेत् अन्नत्वमपर्यंत ग्रहणानुवृत्तिरेव ज्ञापिकेति भाष्यकृतः ननु मपर्यंतानुवृत्तिरपि सर्वादेशा
त्ववारणाय चरितार्था न चोत्सर्गसमानदेशा अपवादा इति न्यायेनासिद्धवल्लत्र भाष्यसंमतेन म
पर्यंतस्यैवादेशासिद्धेस्तदनुवृत्तिर्व्यर्थेति वाच्यं तस्य भ्रमकज्ञवकुनादेशाभिचारादिति चेन्न
भ्रमिमित्वेन वकुचिपुरस्तात् ग्रहणेनाकचिमाकृते ग्रहणे न तस्य बाधे प्यत्रोत्सर्गस्य तागेमाना

भावात् एवं च नमपर्यंतानुवृत्तिस्तस्य तमिसाहोमपर्यंतस्यादेशविधानार्था तत्र चांतरंगत्वात्
७६ त्वमावित्येव सिद्धे व्यर्थासै तज्ज्ञापिका ज्ञापितेत्वस्मिन्नेतद्विषये तवारीनाम आस्यात् तदपवादत्वा
५८ भावेन मपर्यंतस्यैवादेशार्थं साचरितार्थाय त्वंतरंगमप्रवृत्तौ प्रत्यये उत्तरपदे च मपर्यंतासंभवे
न तदनुवृत्तिर्व्यर्था सती तज्ज्ञापिकेति तन्न अंतरंगात्लोपमप्यपवादत्वाबाध्यत्वेन तद्विषये तदप्र
वृत्तेः एङ्। ह्रस्वादिति सूत्रस्थाकरमामाल्पेन रलुग्मात्रविषये यं परिभाषा तत्र हि हे त्र पुरुष
त्रानेन न्यायेन नलोपं बाधित्वा लुग्भवतीति भाष्ये उक्तं नयासयोरिति सूत्रे प्युक्तमंतरंगाच्चविधी
न् सर्वे लुग्बाधते न तु सुब्लुगेव अत एव सनीसंसदृस्यादो नलोपो न भवति यङ्लुगंते अ ७६
नेन न्यायेन नुमत्तावादेङ् ह्रस्वादिति सूत्रस्थं भाष्यं चिंत्यमिति मदीयः पंथाः अनेन च न्यायेनो

तरंगनिमित्तविनाशकस्तु कस्तान्यप्रयोजकसमासादीनां चमावस्यं बोध्यते इत्यस्य च विस्तरः अंत
रंगाविति गुणापेक्षयेतिभावः स्पृष्टिप्रसंगइति यङ्‌कारलोपस्य स्थानिवद्भावेनादेः किंतु तः सत्व
इतिभावः केचित्तु ङकारस्य समुदायानुबंधत्वान्नाकारस्य ङित्वमिति हलन्ते स्पृष्टेर्नैस्याहुः प्रत्ययत्ववत्सं
भाव्यमानङित्वाद्वृद्धिर्दुर्वारेत्याहुः अत एव यङ्‌न्ते वैमिदिते स्याहौ गुणाभावः इत्यस्येति नन्वत्र
विधित्वात्कथमत्र स्थानिवत्त्वमिति चेत् शृणु प्रत्यासत्त्या स्थान्यनुरोधाच्च आदेशस्य यस्य स्था
निवद्भावस्तत्स्थान्यलाश्रये विधौ निषेधः प्रकृते च लोपस्तु वृ इत्यादेः शास्त्रस्य स्थानीभूतोऽन्त्य इति तत्सं
बंधस्यालाश्रयत्वाभावः स्पष्ट एव सर्वैरिति नन्वेवं रीसोपदेशोत्वनड् इति निषेधे कर्तव्ये घसेः स्था
निद्वारकमनादिष्टत्वमपि स्थानिवदादेश इत्यनेनातिदिश्यते तथा च जघासिथेत्यत्रेट्कस्यापत्तिः

८१ अशास्त्रीयधर्मनिमित्तके शास्त्रांतरे वर्तव्येऽतिदेशस्वीकारात् जघस्येति रूपं दुर्वारमिति चेन्न स
वर्णग्रहणमनादिष्टादचः पूर्वत्वरूपधर्मस्याशास्त्रीयत्वेप्यतिदेशज्ञापनार्थं तेनान्याशास्त्रीय
57 धर्मानतिदेशेनादोषात् दक्ष्यते इति अन्यथा यचतिसारौ पुरत्वानापत्तिः केचित्तु वर्णादेशत्वे
पि स्थानिनि इकारे सति जायमानपदत्वस्याने नैवातिदेशः कार्यकालपक्षे न तु यथोद्देशइव सुएसं
ज्ञाया अतिदेशः येन स्थानिवृत्तित्वाभावान्न स्यादतिदेश इति प्राहुः विश्राम्यतीति सीभवदर्थे
वत्त एव स्थानित्वमिति पर्यवसाने स्योऽल्पूपेसस्य स्योऽल्पूर्स्यादेशानुमाने अकारापेक्षया स्थानि
द्वारकं पूर्वत्वं यद्यपि द्विर्भं तथापि स्योऽल्पूर्इस्याप्यर्थवत्वे पदुरोऽप्यर्थवत्वे पृथगेव स्थानित्वक ८१
ल्पना नत्वर्थवत्समुदाये यङ्लाफमेएव लिंहृढ्प्रसंगात् तस्मात्स्थानिवत्वाद्यर्थे पृथग्वस्तु

नित्यकल्पनेनाकारापेक्षं पूर्वत्वं सुलभमेवेति तात्पर्यं· ननु पूर्वत्रासिद्धेनेत्यत्र भाष्ये स्वरदीर्घ
यलोपवर्जे पदांतभिन्नानां ग्रहणस्य प्रत्याख्यातत्वान्नात्र देशेन सिद्धिरत आह किंचेति· जड्डस्या
देशे अतो दीर्घ इति दीर्घे जानातीत्यादिसिद्धौ दीर्घोच्चारणमस्यां ज्ञापकम् अंगे अंगाधिकारे ह
त्तं निष्पन्ने यत्कार्यं तस्मिन्सति पुनरन्यस्यांगकार्यस्याहृत्तौ गहणावविधानं भवतीत्यर्थः ज्याहा
दीयस्य इतीकारलोपे कृते सार्वेति दीर्घे ज्यायानिति सिद्धे वाद्विधानमपि ज्ञापकं इत एव भिन्न
स्थानिकांगकार्यविषयाप्येषा द्व्यमनित्या द्वयोरेकस्य तिनिर्देशात् अनित्यत्वं लभ्यार्थमेवाहाय
भसोऽप्रमित्यत्र भाष्ये निष्ठितस्येति पठितं केचित्त्वनया न किंचिल्लक्ष्यं साध्यते अत एव ज्ञापकसू
त्रद्वये किं प्रयोजनमिति प्रश्नेपि वेर्गुणप्रतिषेधस्त्वोदितः सनवकाशो भवतीत्येव प्रयोजनमन्यथा

त्सिद्धमुक्तं अदंतादेशेन गुणाभावसिद्धेः अभ्यमित्येवच्छेदः पररूपेण शुभ्यामिति सिद्धमिति ज्ञाय
४८ नपरं भ्यसोभ्यमिति सूत्रस्थं च भाष्यमेकदेश्युक्तिरित्याहुः यत्तु धर्मिग्राहकमानेनांगकार्ये प्रसेवय
48 दन्यदंग — कार्यं प्राप्नोति तत्र भवतीत्यर्थः न चात्र लघूपधगुणः उवङ् सत्येव प्राप्नोति पूर्वमपि नत्वा
प्नेरिदमसदिति तन्न व्यक्तिपक्षे उवङ्प्रवृत्तेस्तु नरमेवङ् स्थाकारस्थानिकगुणप्राप्तेः न भविष्यतीति
·संज्ञापूर्वकविधेरनित्यत्वादित्यपि बोध्यमित्याहुः ॥ तदवयवः प्रत्ययावयवः विलंबितिलोपास्थिति
कइति किंच उत्तरस्त्वत्र साहचर्यात् त्रिस्थानिकस्यैव ग्रहणमित्यपि बोध्यं अस्येते: पतेश्वतस्यैव
संभवात् प्रतिपदोक्तस्येति संज्ञापूर्वे कत्वा न गुणेनेत्यपि बोध्यं पर्युदासेनेति प्रतिपदोक्तपरिभाषा ४८
संस्कृतेनेत्यर्थः तथा च श्रूयमाणत्वाभावान्न लोपइत्यर्थः नत्वङ्गीति व्याख्यानं नु प्रोध्या अनर्थ

कत्वेन साहश्यं नुनर्वितो नर्थकस्यासंभवात् प्रतियोगिहृतियावद्धर्मसाजात्यस्य कित्वावच्छिन्नेषु अ
संभवान्न स्वास्वाभाविकाजादित्वादिः वग्रहणं तेन जग्मुषः जग्मजग्मि वेत्यादौ न दोष इति प्राहुः ज्ञाप
केनेति शितिपाशपेत्यस्यानित्यत्वज्ञापनादिति भावः यद्वा यत्र अचूपदे एकत्वविवक्षयैवैकाचूत्वे
लब्धे एकग्रहणस्य प्रयोजनं यथैकाच उपदेश इत्यत्र वधादेशव्याहृत्यादि तत्रैवाश्रितपेक्षितनिषेधप्र
वृत्तिरिति ज्ञाप्यते अत एवाजर्धाद्दृत्यत्र भाष्य भावः केचित्तु धर्मियात् कमानेनैकाजित्यर्थकं यत्रा
चूपदं तस्य प्रवृत्तिर्वोध्यते इति न क्वापि दोषशंकेति प्राहुः वक्ष्यमाणत्वादिति पक्षांतरे विहितविशे
तविशेषणात् सूत्रारंभवादिमते दूषणमाह किं चेति गुणः स्यादिति प्रागुक्तरीत्या वारणे तु भा
ष्यरीत्या रव्यानेपि न दोष इति दिक् किति च योगविभागस्य भाष्यानारूढत्वादाह सौत्रत्वादिति

इत्याहेति एकवचनेनारुचिः तद्वीजं तु मत्स्ययविधोपं चमंत स्याहृस्याकारादेश विधानार्थं षष्ठ्यंतत्व
५९ कल्पनमिति गौरवमिति भावः नन्वेतन्मते इति अस्माकं तु णित्वान्न शंकेति भावः निमित्तेति अन्यथा
निर्दिष्टपरिभाषाप्रवर्त्तेतेत्यर्थः औरीतीति अनियममप्रसक्तमभावादित्यर्थः प्रकरणादिति अनिषे
धइति शेषः निषेध्ययेति निषेध्यक्रियाविशेषणीभूतेन कूपदेनेत्यर्थः सिद्धसाध्येति मलिनंतेवधुः
स्नायाइत्यत्रैवेत्यर्थः सिद्धसाध्येति साध्यगुणहृद्धी सिद्धं कुर्तीतितयोः समभिव्याहारे सन्निधा
वित्यर्थः साक्षान्निषेध्ययैत्सस्यैचैं सा क्रियया संबध्यते सम्बन्धः एतेन स्यान्निभृते गृद्धारैवतस्य
क्रियाविशेषणत्वात्साक्षादित्ययुक्तमित्यपास्तं साक्षान्निषेध्ययेत्यस्य च साक्षान्निषेधान्वयिन्या ५९
भवति क्रिययेत्यर्थः इह तु गुणभूतया प्राप्तिक्रियया संबध्यत इत्याह इहेति क्रियान्वयिन्यैवेति

यथे कोयगणवीत्याद्येयद्यपिक्रियान्वयीयगणस्तथापितस्यासिद्धत्वेन अत्र परत्वासंभवेनसा
मथ्यान्तरन्वयीगृह्यतइति वोध्यं नचयस्य जातस्याचपरत्वंभावीति भाविवुद्ध्याश्रयणेनसाक्षा
त्क्रियान्वयिविशेषणत्वमेवास्त्विति वाच्यं एत्येधतीत्यादावसंभवात् इदं तुक्रियान्वयिनइति
प्रधानक्रियान्वयिनो गुणभाविक्रियायाइत्यर्थः ननुक्रियायाइति प्रधानत्वि वे ध्यक्रियायाइत्य
र्थः अतो चेति प्रधानक्रियान्वयिनि चारितार्थ्यादिति भावः अन्येतुगुणप्रवृत्तिविशेषणत्वपिकिं
त्वव्यवहितेउपश्लिष्टस्यपूर्वस्यये प्राप्नुतइत्यर्थसत्वेन परिभाषादुर्वारेति चिंत्यमिदं अनुवादेइ
तितुभाष्यानुक्तं कारकसत्ती संभवेउपपदविभक्तेरित्यनेनन्यायेन यस्ये चेति सति सप्तम्युपु
त्रैव सिद्धसाध्येतिन्यायस्यतु परिभाषा वाधिकेत्याहुः अन्येतुसर्वत्रविधिवाक्येसप्तम्यंतस्य।

विधेयान्वयोऽसंभवी विधेयस्यानिष्पन्नत्वात् तद्द्वारकक्रियान्वयस्यासंभवाच्च नाधिकरणस
५० प्तमी अधिकरणसप्तम्या कर्तृकर्मद्वारा क्रियान्वयात्कारकत्वं वाच्यं तच्चासंभवि सप्तम्यंतार्थ
50 वृत्तित्वात् विधेयक्रियायाः कपाले घटो भवतीत्यादौ तु कपालवृत्तित्वाद्घटस्यानिष्पन्नघट
द्वारैव क्रियाश्रयत्वं अचीत्यादौ तु नैवम् अज्वृत्तित्वाभावाद्गुणभवनस्य किंच तस्मिन्निती
ति सूत्रे पूर्वस्य परस्यानन्वयापत्तेः निर्दिष्टपदेनाधिकरणत्वाभावबोधनाच्च तस्मात्तस्मिन्नि
तीति ज्ञापकाद्विधेयान्वय्यन्वयिवाचकात्सप्तमी सर्वत्र सौत्री यत्र सा सप्तमी तत्रैव तस्मिन्नि
त्यस्योपस्थितिर्नान्यत्र किंतु तीतीति यत्तु लक्ष्यानुसारात्सप्तमी विधेयान्वयिनो योग्यस्य सप्तम्यं ५०
तार्थान्वयिनोऽभावान्नेयं तादृशीति न परिभाषोपस्थितिः तथा च सिद्धसाध्येति न्यायेन निमि

णत्वस्याभः शसादिपदानां लक्षणवदियमपि सप्तीलस्यसिद्ध्ये इत्यर्वाचीनाः प्राहुः प्रधानान्व
यिनि प्रवृत्त्या विधेयान्वयसंभवेन चरितार्थे प्रधानान्वयमन्वयिनि प्रवृत्त्यसंभावात् षष्ठीस्थाने
योगेत्यस्य षष्ठीचामात इति स्थानेग्रहणं न सिध्येदिति यस्याचामादेरेकः स्थाने वृद्धिरित्यर्थाप
त्तेरिति भावः सूत्रं त्वौपगवीयमित्यादौ चरितार्थम् गुणानां चेति उपकारकाणां प्रधानोपका
र्यार्थत्वात्परस्परमसंबंधः गुणगुणिभावाभावः समत्वात् तुल्यत्वात् उभयोरुपकार्यार्थ
त्वात् फलवत्संयोगे ऽफलं तदर्थमिति न्यायात् द्वयोरफलत्वात्परस्परमसंबंध इति यावत्
अनुभूयप्रधानेनेति न चैवं प्रधानकर्थैवोच्छिद्येतेति वाच्यं यत्र प्रधानान्वये यत्फलं तद
पेक्षया यत्र अधिकं गुणान्वये तस्य चेष्टत्वे हृत तरं प्रमाणं तत्रैव न्यायांगीकारात् तदेतदुक्तं

महतेरित्तिमक्ते चतादृशत्वं स्पष्टमेवेस्याकुः गुणः क्ङितेति विशिष्टस्य वैशिष्ट्यमिति रीत्यावोधः

५१ ह्रिहेंतौ यतस्तथा सत्तिमन्यसि महति प्रधानोपकारे वर्त्तते प्रधानस्य महानुपकारो भवतीत्य

51 र्थः सनः कित्वं रुदविदेत्यादि यद्यपि ग्रहादिषु संप्रसारणप्रवर्त्तकत्वेन कित्वं सार्थकं तथापि रुदि

विदिभ्यां परस्य सनः कित्वं ज्ञापकमेव रलोव्युपधादित्याद्यपि वोध्यं यथा व्याख्यानमिति वस्तुतो

निमित्तग्रहणमेव कर्त्तव्यमिति भाष्यवार्त्तिकहृदयमिति तस्मिन्निति सूत्रे निरूपयिष्यामः दोष

इति गुणस्य चङादिभिन्नत्तिपूर्निमित्तत्वान्निषेधानापत्तिरूपइत्यर्थः अंतरंगत्वादिति जातस्यव

हिरंगस्याद्यर्थान्तनाजानंतर्येइत्यस्य विषयइति भावः तेन क्ङित्प्रत्यये रूपद्वयंगीकारेण नासौविक ५१

ल्पइति इदं यथाश्रुतसूत्रारंभे प्रत्याख्यानेतु नैषदोषः दुर्घटेतित्वदुक्तरीत्याप्राप्तभावाद्यवस्थि

तद्विभाषापर्यंतानुधावनं वृथैव स्यादिति भावः यद्यपि विकल्पेनेदं सिद्धं तथापि सन्नद्धिकरूपाभावार्थं
सत्यभिमानः ननु परकीयेति उभयोरेकार्थतानापत्तेरिति भावः किंच आरंभंते इति स्वारस्यादस्यानुवा
दकत्वमेवाधित्वे द्वितीयोपादानमसंगतं स्यात् विधेये प्रथमायायुक्तत्वात् अत्र सूत्रं यमप्रजे स्यत्र भा
ष्य एवेति धातोः परस्मैपदानामिति सूत्रयोः मुख्यत्वाभावस्येति मुख्याजादित्वं तु नातिरेश्यं अशा
स्त्रीयत्वात् चरितार्थत्वाद्दिति एतेन सोऽहिं दुश्चेति सुवचमिति हरदत्तोमपास्तं अतएव नाडनुदात्तड
ति सिद्धांतः अतएव तुल्यास्याप्रयत्नमिति भाष्यमासांतरं संगच्छते इत्याहुः नाक्षिति वाड्लरुचिः त
द्वीजं तत्स्वस्तप्रहणे मात्रागौरवं अन्येतु स्यान्ननुरूपेनुदात्ते एवोच्चारणीयेउदात्तोच्चारणे तस्य
विवक्षयोदात्ते सिद्धेऽपि वचनं ज्ञापकमेव अपि वचनसामर्थ्यादंतरतमयपरिभाषावाधावेक्षस्यैवं

कत्यनस्यल धुत्वा दिति प्राहुः अपहारादिति नचापहारेऽपि स्थानिसंबंधित्वादनुबंधस्यानेषेधः स्या
५२ दितिवाच्यं स्थानित्ववदत्राप्यये विधौ नेत्यर्थे नाशो यात् उच्चरितप्रध्वंसित्वेन स्थानित्वाभावात्
52 मत्वर्थायिनि नैवमर्थत्वाभावात् सानुबंधकविधौ गुणिजिसाहौ नकारेत्संज्ञकः सशब्दः प्रत्ययो भवती
त्यर्थः सम्मतद्रसादावनुवादे नकारेत्संज्ञकसशब्दे इत्यर्थः सूत्रे षेवानुबंधानामित्संज्ञापहार्थीय
।स्यितिरनुबंधरहितैवेसास्माकीनः पंथाः सिद्धमिति स्थानिवत्वाभावरूपं प्रयोजनमिति शेषः अ
निरक्षण इन्द्रे: क्ङिति चेति निषेधापवादगुणस्य च निषेधार्थं ङित्वं कुतो नेति शंकते ननु स्तुयादि ५२
स्तादाविति लुगविभक्तिकमिति लुप्तसप्तमीकमित्यर्थः हृदयमिति हृदयपदबोधितो यं भावः
ङित्वे स्थानिवत्वाभावार्थं चाऽनिक्ष्म क्षणत्वेऽपि वृद्धिनिषेधप्रवृत्त्यर्थं चास्यादित्यत्र विनिगमका

भावादुभयार्थमेव भवति ङि॰त्वासार्थक्योपपादकत्वादुभयोः अन्यथा सिद्धार्थज्ञापयोना
पेक्षयास्वमात्रायत्तार्थज्ञापनेवैयर्थ्यशंकानवतारात् इक्परिभाषया वृद्धिनिषेधस्य अनादावित्या
दिव्याख्यानेन गुणाभावस्य चासिद्धेर्वैयर्थ्यानुद्धारात् ङि॰च्चपिन्नेत्यस्य वार्त्तिकमते असत्वेन स्तुया
दित्यत्र स्थानिवत्त्वेन ङि॰त्वस्य सुलभत्वात् निर्दिष्टस्थानिकत्वेपि निषेधप्रवृत्त्यर्थमिक्परिभाषो
पस्थितेः सप्रयोजनकत्वात् किंच स्थानिर्देशस्येक्परिभाषोपस्थानप्रतिबंधकत्वे नमाणि मंत्रा
दिन्यायेन तत्वे प्रमाणाभावात् किंतु प्रयोजनाभावे द्वव प्रयोजनं चाग्ने ग्निवृत्तिवत् निषेधसंपा
दनमपीति स्यादेवपरिभाषोपस्थितिः वार्त्तिकमते ङि॰च्चपिन्नेत्यस्यासत्वेपि भूतादित्यत्र ब्रुवईडुभा
वस्तु ङि॰त्वमेव क्वचिदनुबंधकार्ये नत्विधाविति स्पष्टप्रवृत्तिं ज्ञापयतीत्यर्थेन साधयितुं शक्यमिति

भाष्यं योगविभागेस्य त्वान्नित्यमेवेति प्राहुः न्यायादिति विशेषविहितेन ङित्त्वमित्र भवतीत्यनेननि
५३ षेधेन सिद्धेन्यायस्यास्य प्रयोजनः प्राग्वदेतिवे अजाद्यानुकाराद्यैवेति व्याख्यानेनेति भावः कथंचि
53 दिति भाष्यानुमतत्वाल्लघ्यं चिन्त्यं किंच निलोपे स्येच सिद्धे आनीत्यस्यस्थानापकत्वासंभवः सार्थक्या
नुपपादकत्वाच्चाप्यार्थस्य सागरं तर्हि मित्याद्यसाध्यैवेति परे दिगिति दिगर्थस्तु वार्त्तिकमतेप्येव
मेवोपपत्तेर्भाष्यमतेन चमत्कारावहम् दीधीवेवीटाम् स्यादिति प्रयोगबाहुल्यादभ्यर्हितत्वेनत
स्यैवस्याद्यागमत्वेपीति चिंत्यमिदं प्रत्याख्यातमिति ननु तत्राभ्यस्तलोपादेशेपि स्थानिवत्त्वप्रो क्तंगी
कृतस्य चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधं च मात्वाशङ्क्यास्मिन् च मममात्वादित्यर्थभावश्यकं चानंगीकृ ५२
तस्य स्थानिवत्त्वेनैव ह्रस्वाभावसिद्धेरग्लोपिग्रहणं व्यर्थमित्याशंक्याग्लोपिग्रहणमिकुर्ध्वंपंचपाद्यां

स्थानिवत्वाभावस्यज्ञापकमित्युक्तत्वाच्च एवं तर्ह्यादीधयते रादीधकः आवेवयते रावेवकः यीवर्णयोरि
तिलोपो न प्राप्नोतीत्याशंक्य वर्णग्रहणसामर्थ्याद्भविष्यतीत्युक्तं भाष्ये वर्णग्रहणसामर्थ्याद्भू
तपूर्वगतिराश्रीयत इति च तदर्थ इति कैयटः नह्विरुध्यतेति चेन्न तस्यान्यभाष्यविरोधेनान्याय्यप्र
क्तत्वेनैकदेशयुक्तित्वात् अंतरंगत्वेन लोपसिद्धेश्च अतएवांतरंगत्वाल्लोपे सिद्धे वर्णग्रहणं
शक्यमकर्तुमिति कैयटः अत्र भूतपूर्वगत्याश्रयणेऽचः परस्मिन्निति सूत्रस्थ आदीध्य इति भा
ष्यप्रयोगोप्यनुपपन्नः स्यात् अंतरंगत्वेन णिलोपात्पूर्वं यीवर्णयोरित्यस्य दुर्वारत्वात् भूतपूर्वा
श्रयणे फलाभावाच्च न चाकृतव्यूहपरिभाषया यो नेति वाच्यं स्थानिवद्भावस्य दुर्वारत्वेन निमि
त्तविनाशाभावात् तत्रेणयकारे परतो लोपेवार्त्तेन स्थानिवदित्यर्थे प्रमाणाभावाच्च । न चास्योपि

ग्रहणसामर्थ्यादीदशोविषयेनस्थानिवत्त्वमितिवाच्यं अगनग्लोपेऽग्लोपेपि अजेर्भूत्वादेशोऽ
५४ जादेशोनेस्य चः परस्मिन्निति तत्र भाष्यकृतानिलीनत्वात् तस्माद्वर्णग्रहणं न्यायप्राप्तार्थानुवाद
54 कमित्याशयएवभाष्यस्यस्याभिप्रेत्योक्तं भाष्ये प्रत्याख्यातमितीतिदिक् इग्लक्षणेति नचाका
रस्याप्यजये निर्दिष्टस्यानिकत्वेपीकपरिभाष्योपस्थितिः स्यादकारादिव्याप्त्यर्थमिति वाच्यं अ
ज्ग्रहणसामर्थ्येन तदनुपस्थितेः निर्धारणषष्ठ्योत्तरत्राप्यनुपयोगाच्च इकपरानुपस्थित्यर्थमि
वाच्ग्रहणात् च निर्देशश्चेति न्यायसिद्धौ व्येषा समर्वपि कारणनिमित्तकारणयोर्भेदस्यलोकसि
द्धत्वेनसमवायिकारणस्यनिमित्तत्वेनाश्रयणाभावात् इति कार्यिमध्ये स्थानषष्ठीनिर्दिष्टसनंतम ५६
ध्ये अन्यथाप्रतीतिसम्भवेनेत्यस्यस्यस्वारस्यं तत्त्वे मतिबंधने अनेकाच्त्वसंपादनद्वारा· यत्स्यसयेति

यद्यपि एपताप्येतत्तु साधं तथापि स्वरे विशेषो बोध्यः एपेति स्वरितांतत्वं पतित्वाद्युदात्तत्वमिति अ
न्यथा सम्पङ्कोरिति सप्तम्याश्रयणे कार्यिणो निमित्तत्वे नाश्रयणे च समर्थः इत्यादौ सादिना ऋधेः स
निरूटिन्नघूयधगुणेपि इसो द्वित्वनिमित्तत्वे न द्विर्वचने चीति गुणस्य रूपातिदेशो निषेधे वाधिस्
शब्दस्य द्वित्वे ऋकारस्यानुपधात्वाद्गुणो न स्यादिसर्दिधिषतीत्यस्यासिद्धिर्बोध्या कृते इति द्विरु
च्चारणत्वात् द्वित्वस्य द्वित्वनिष्पन्नस्यापि इस शब्दस्य प्रत्ययतया ऋधातोर्गुणे कृते इति भावः स्या
दिति सप्तमीपक्षे तु ऋशब्दस्यैव द्वित्वं स्यात् षष्ठ्यंतत्वेन स्यादेव वा उभयथापि प्रकृत रूपासिद्धिः
स्पष्टैवेति दिक् इस शब्दे इति स्थानिवत्वात् इस शब्दे इस शब्द इति यदागमा इति न्यायेन सए
व सन् इत्यर्थः नवृ शब्दस्येति द्वितीयस्यैकाच इत्युक्ते एतावन्मात्रस्य द्वितीयस्येति प्रत्याख्याने

व्येकाच आदिभूतादचः परस्येत्यर्थे नादेशवात् एतेन षष्ठीपक्षेनावन्मात्रस्य कथं द्वित्वमितिचिंत्य
५५ मित्यपास्तं तद्भावभावित्वेनेति षष्ठ्यंतत्वपक्षे निमित्तत्वाभावेन स्थानिवद्भावाप्रसक्तौ हीदमुक्तं का
55 र्यमनुभवन्निस्यथाभावे ऽसंगतं स्यादिति इदमेव भाष्यमत्रार्थे प्रमाणं विधानादिति लिटि आर्धधा
तुकेइत्यादीनां विषयसप्तमीत्वे पि तद्भावभावित्वेनैव तद्बुद्धिभावभावितामात्रेणापि निमित्तत्वस्य
वक्तुं शक्यत्वात् अत्र स्तोत्रपाणि लिट्भाव एव निमित्तमित्यज्ञनिमित्तत्वानुद्धिभावः सर्वत्रैव तद्धात्र शा
स्त्रबुद्धिकृतमेव निमित्तत्वादिदमेव वाचीतिई दृशं निमित्तत्वाश्रयणेऽलिंगमिति भावः अनुवर्त्तत
इति एकदेशोऽप्यनुवर्त्तत इति नैतस्यानानुवृत्तिरित्यर्थः परं त्विदं नेड्वशीति सूत्रस्य भाष्यविरुद्धं तत्र ५५
हि नेड्वशीत्यतोऽनुवर्त्तमानेनेट्ग्रहणेन सिद्धे इड्ग्रहणमार्धधातुकस्येडित्यत्रानुवर्त्त्यमितीड्ग्र

हलंग्रस्याख्यानं इहतु विकाराभावार्थमित्युच्यते इति चिंत्यमिति तत्रेयं चिंता लाघवान्नेड्वशीति सू
त्रभाष्यकृत्कृतं प्रत्याख्यानमेव सिद्धांतः गुणनिषेधसूत्रस्थमिड्ग्रहणं प्रत्याख्यानं भाष्यं त्वेक
देशयुक्तिः विकाराभावार्थमिड्ग्रहणं तु ह्नुत्रेरिड्ग्रहणस्य चरितार्थत्वेन गौरवात् इड्ग्रहणमे
वात्र संलघु किंच ग्रहोलिटिदीर्घ इत्यादिसामर्थ्याद्दीर्घ इत्यपि गौरवं किंच सिज्लोप इति ज्ञापकाश्रय
णाद् इति गौरवं एतेनार्धधातुकस्येडिति सूत्रस्थमिड्ग्रहणमिड्डुदेव न तु विकारोपलक्षणमिति तदर्थं ति
नरीधीति सूत्रस्थमड्ग्रहणं न कर्तव्यं भवतीति भाष्यमपि गौरवत्वाघवसह हृतनेड्वशीति सूत्र
स्थभाष्यविरोधापत्तेश्चयुक्तिरिति सूचितमित्यलं इदमेव ध्वनयतोपसंहारे अत्र सभाष्यमेवप्र
माणमित्युक्तम् इति प्राहुः ज्ञापकादिति नच समर्थः सन इति स्थितेऽभ्येति किंत्वा हुणप्राप्ताबाट

श्नुतेति बाधित्वा परत्वात्सिज्लोपे वृद्धिरिति समर्गौति सिद्धिः अत्र सिज्लोपइस्य भावे सिज्लोपस्याऽ
५६ सिद्धत्वाद्वृद्धौ सिज्लोपो नस्यादित्यर्थवत्त्वे कथं ज्ञापकमिति वाच्यं हलन्ताविसेवववदेत् न च सिचि
56 वृद्धावपि सिद्धत्वाप्रत्तिः तथा चासिद्धामित्यस्य सिद्धिरिति वाच्यं प्रत्ययलक्षणेन हलन्तावपि अहृतत्वमू
हादृति पूर्वं सिज्लोपाप्रवृत्त्या रूपसिद्धेः न चाधीत्यैष्टेस्तत्रापि लोपाप्रवृत्तिः अहृतन्मूहाइत्स्य दे
यात् अस्याः अनित्यत्वात्समर्गौत्यत्र न दोषः वस्तुतो हस्वादङ्गादिति संगग्रहणेनास्यागत्वाद्धात्वङ्गे
गमित्येव समार्गौत्यस्या सिद्धिरिति भावः अयरे तु प्रत्यासत्त्या सिज्लोपनिमित्तकैकादेशं प्रत्येव सि
द्धत्वं नान्यत्रेति प्रकृते तस्याविषय एव किंच लावस्थायामडिति पक्षे सर्वतोन्तरंगत्वेन सिज्लो ५६
पो दुर्लभः तदेकवाक्यतया पक्षान्तरेपि तल्लोपे एवोचितइत्याहुः अन्यत्तरेतिकुठः ह्रिनिमित्त

त्वात् क्रौष्टुमत्वाप्तिश्च: असिद्धवदिति वचित्तोपेकर्मण्ये स्थानिवत्वाद्धलोपो न स्यात् इत्यर्थः नच
यस्लोपेति निषेधः एवापि स्थानिवत्वेन यण्णापत्तेः व्याख्यानं विनेति अह्लोमणि लोपयोः स्था
निवत्वेनेष्टनापत्तेरित्यर्थः रुपासार्दित्यत्रेति सखुरित्येतत्सिध्यर्थमपयंतेति युष्म अस्मद् इतिप्रसं
अंतरमवकाशोत्य-वोकेनगोः हलोऽनंतराः संयोगः छिद्रवाच्चिनेति छिद्रं ह न्तृत्वाक्रांतवर्णेशत्न्वः कालः सामर्थ्यात् सिद्धं
तेऽवग्रहे फलाभावात् अवग्रहेपीति मध्यवर्णाधेयांतराभावात् कालस्तु आधेयो नेत्यर्थः इत्या
दीनां इत्यादि घटकीभूतानां गोइत्यादीनां एतेन संप्रदायानुसारेण सिपासन् उवण्य शासः शीरिष
इति संहिताकालेभिसः पूर्वमेव तत्रैव नत्तु म स्वरपदोत्तरं प्रत्येकमिति व्याख्यानात् यत्तु सहविव
सायां द्वंद्वापवादैकशेषविधाने न हलद्वय इति निर्देशात्साहित्यप्रतीतेरपि समुदाये संयोगसंज्ञेति तत्र

परंतु
एवं चात्र मतेकालवर्णो
भेदव्यवायत्रिविधः॥
संतापिकारवहिर्भूतानां
कोलव्यवायेविप्रदेतेः
सर्वसापिते भवेनव्यवा
यो एव निषेधपर्यवसा
नेमित्यतो न फले विशेषः
भाष्यादिग्रंथानुशिष्यवृ
स्यादृताय प्रवृत्ता इति निर्व
चनरस्तम्॥

५ नवर्णाभावववर्तकालं व्यवायाभाव [illegible]
वंतो हलः संयोग इत्यर्थे पनत्त नित्यत्र
विशेषणाभावमवतुक विशिष्टाभावस
त्वादित्याहिरतो हलन्त्वाक्रांतेति॥
कैयटादयो प्यवं परतयैव नेयाः॥

धवैश्चेषामित्याद्वावेकशेषसत्वेपिप्रत्येकमेवस्यानित्वात् नचद्वयोर्न्नेस्यादितिवाच्यं हलौचहलश्चे
५१ त्येकशेषात् इंधिधातोःकित्वविधानाज्ज्ञापकात् अन्यथासंयोगादित्येवसिद्धेः किंतेनेत्यप्याहुः
57 तच्चिंत्यं एकत्रान्वयमात्रेणसाहित्योपपत्तेस्त्वदुक्तार्थेमानाभावात् पंचानामेकत्रसत्वे एवापत्ते
श्चेत्यप्याहुः इदंचिंत्यं धवश्चेषामित्यादौव्यभिचारात् विशिष्टेविशिष्टान्वयएवसहविवक्षेत्यर्थ
स्याद्यंतावितिसूत्रेभाष्येस्पष्टत्वात् एकत्रान्वयमात्रेणोपपादनेऽज्ञाविधनोदेवदत्तयज्ञदत्तावि
त्यत्राव्याप्तेश्च क्रियान्वयित्वमात्रेणसाहित्यस्योपपन्नत्वादज्ञाधनोदेवदत्तोऽविधनोयज्ञदत्तइत्य
न्वयविवक्षायांसाधुत्वापत्तेश्च• तथाहिसति प्रत्येकंसंयोगत्वे यकारइति रेफसंनिधाने रेफय ५१
कारयोःप्रत्येकंसंयोगत्वमित्यर्थः जातौचेदमिति पद्यात् हलौचहलश्चेत्येकशेषः अनुदात्ताना

मित्तिपदे भाष्ये तथैकशेषकरणात् इत्यन्ये द्विगिति वस्तुतो द्वयोर्द्वयोरेव संज्ञा न बहूनां सल्लिपरे सं
योगादिलोपविधानात् बहूनां संज्ञायां फलाभावादित्यन्ये नकर्त्तव्यमेवेति न च द्वितीयस्येतर
भावेऽचउत्तरस्य सर्वस्य द्वित्वं स्यादिति वाच्यं एकाचरस्यानुवृत्तेरदोषात् मुखनासिकाकर्मणी
ति तया वचनमिति साधनं क्ते इति समासः करणे ल्युडिति अधिकरणे ल्युडिति भाष्यस्वरसः प्रासादवा
सिन्यायोपन्यासादित्येके ङकारादीनां नासिक्यत्वगुणरहित—रूपानुपलंभेनोभयावच्छेदेन वस्तु
संयोगोत्तरमेव स्वरूपोत्पत्त्या विनिगमनाविरहेणोभयोः स्थानत्वं अनुनासिककारादीनां तु कंठाद्य
वच्छिन्नवायुसंयोगेनोत्पन्नेषु ककारादिषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्यानेषु नासिकाः
या गुणोत्पादकत्वान्न नासिकास्थानं अत एव भेदकत्वाद्गुणस्येत्यादौ गुणत्वेन व्यवहार आनुनासि

वृत्यभाष्ये कृतइत्यपि बोध्यं नपुंसकमिति स्त्रीत्वे हि वचनीक इति स्यात् न विरुध्यत इति गुणवच
५८ नानासिकस्य नित्यं संस्कृतं भस्त्राद्इति निर्देशादिति भावः ततो मुखेति समाहारद्वंद्वेनपुंसकत्वापु
58 त्वान्मुखसहितानासिकेति मध्यमपदलोपिसमासे बहुव्रीहिरित्यर्थः दृष्टासनयोरिति सूत्रस्यस्य
भाष्यप्रयोगादेकवज्ज्ञावस्यानित्यत्वात् द्वंद्वोपि साधुरित्याहुः मेवमाभूदिति एतेषामेवान्मूनान
तिरिक्तनासिकावचनत्वादिति भावः एवकारेण केवलनासिक्यत्वमेतेषां अन्यथा एवकारासंग
तिरिति बोध्यं आगमः आगमइवापूर्वः अनवयवत्वाद्यमस्य प्रासादेति संपूर्णो वर्णः मुखेन ५८
नासिकया चोच्यते अतएवोभयस्थानत्वमेषां इति भावः नासिक्यत्वमप्यस्तीति ओंइत्यादेभो
गस्य नासिक्यत्वात् केवलनासिक्यपदेन ग्रहणं संभवइति भावः नासिकास्थानमेषां तयात

इत्यानुविधित्वात
छंदसश्चिंत्यमेतत

त्र गुणोत्पादादित्यपि बोध्यं शेषस्येति रकारस्यानुनासिकापत्तेरित्यर्थः स्पर्शा इति अननुनासिकाः
स्पर्शाः अनुनासिकेषु स्पर्शेषु परेषु स्वान् स्वसमानाकारान् यमान् जनयंतीतितदर्थः ऊष्मप्रकृतेः
ऊष्माणः शषसहाः प्रकृतिर्यस्य तस्मादित्यर्थः परस्ताच्छब्द इति किंच स्पर्शस्यैव यमत्वे निषेधो व्य
र्थः मकारस्य मकारस्य विद्यमानत्वेन निषेधांतरस्याभावात् एतेन प्रतीपादिति पाठस्य सत्वा
त्तेदं साधकमित्यपास्तं भाष्ये तथा पाठेपि हृन्नोनथैव पाठाच्च किंचोत्तरस्यर्थेकापत्तिपरस्वारस्ये
नवर्णांतरत्वप्रतीतेः प्रातीयादिति पाठोपि तव नार्थसाधक इत्यलं यमः प्रकृत्यैवेति यमः प्रकृ
त्या पूर्ववर्णेन सदृशश्रवण एव समानकालत्वात् मुखव्यायमे श्रुतिर्नास्तीति चैतदर्थः स्वपूर्व मवेति यमः
प्रकृत्येति पदाभ्यामित्यर्थः जकार इत्येते अनचि चेति द्वित्वेनेति भावः न च यमानाम कारोपरे पाठा

रच्चत्वारवच्चिवेति निषेधः स्यादिति वाच्यं उक्ताशिक्षावचनसामर्थ्यैनैव तत्प्रहाणेः छोरसत्वाच्चेत्या
५९ हुः द्वित्वोत्तरं यमोत्पत्तिरिति तु युक्तमित्यप्याहुः वस्तुतस्तु अज्ञानम्मित्यादौ जकारद्वयसत्त्वात्स्वाभा
59 विकीति तत्वं यज्ञुद्धस्य जानातीति ज्ञः यस्य ज्ञ इति समासः हकारस्य श्रुतत्वं एवं जकारद्वयं स्व
तएवेति निषेधशंका सामर्थ्यादिकल्पनाच्चिंसेति प्राहुः अनं सेति अं नं साः कादयः अंसाः द्वार
यः एतेन मध्ये इत्यनेन द्वौ गकाराविति यमद्वित्वयोः समानकालेवोत्पत्तेरित्यर्थः एवमेव सर्वत्र
बोध्यं एतेन द्वित्वनिषेधशंकापरास्ता· अशरीरमिति अदितश्चतुर्वर्गानां यमत्वे अशरीरत्वोक्ति
विरुध्येतेति भावः श्रुत्याभावं ङकारस्य वर्णान्तरत्वेन चवर्गाभावात् आदेशत्वाद्यमस्येति भा ५९
वः पाठांतरं त्विति तुना तस्यासंगतत्वं बोधयति भवत्वेवेति नकाररूप चवर्गयोगादिति भावः

एतेन ञणोर्यमे वर्णान्तरं ञकारस्य स्पष्टं शिक्षायां वर्णान्तरत्वानुक्तेः मुखनासिकावचन इति दिशादि
त्वात्तासाम्यमिदं स्वांगसमुदायस्य स्वांगत्वाभाववच्छरीरावयवसमुदायस्य शरीरावयवत्वाभावात्
अपरे तु न विशिष्टमिदं स्थानं अष्टौ स्थानानीति शिक्षाविरोधात् प्रातिशाख्यादि तु छांदसत्वान्न विरोधि
मिसाङ्कः इत्येकमिति अत एव ङकारयोः सावर्ण्यं तुल्यस्थानत्वादिति भावः तेषु परीक्षात्र पूर्वभागेन
नासिकयापरो मुखेन एतन्मतद्वये ईषत्स्पृष्टं श्वासस्त्वत्र मुखत्वं नासिकात्वं चोपपाद्यं सावर्ण्येऽपि
पत्तिर्वोध्या नञ्स्येनेति मतद्वये संपूर्णस्यतयानुस्वारणादिति भावः मतविशेषे वे वर्त्मनासिका
स्थानो चेति मते गह्वरन्निति अन्येषां वो वर्त्मनासिक्यत्वाभावादित्यर्थः अप्रतिपत्तिरेवेति अन्व
र्थत्वेन ननकारादि प्रतिपत्ते क्लिष्टं समेतत्र दर्शनद्वये अंशे नासिकाव्यापार इति मतद्वये सार्थकमिति

यमाद्यप्रतिपत्त्यर्थं प्रथमदर्शने तु भाभ्यां संपूर्णेऽत्यते इत्यस्मिन्न सिद्धेति अनूनानतिरिक्तयहेमा
नाभावादिति भावः ननु भूयवचनानां संज्ञानामपि यमानुस्वाराणां नासिक्यत्वात्तेषामपि संज्ञाप्रा
६० 60 मनुनासिकविधौ तेषामप्युपस्थितौ तेनेपि स्फुरन्न आह ओंनर तम्पाचेति भाष्येऽप्यत्रैव मिति नैव
ह्रोषड्डस्येवं सिद्धांतभाष्यध्वनितमेतत् कलोपइति अनुस्वारोपदेशोत्वनेन दीर्घक्रारानोपदेशे
च---र्येइति भावः चकारलोपइति तेनैव सूत्रेण वत्वस्यासिद्धत्वाज्झेते नपरत्वे पञ्चोपो ।
पितेनैव ध्वनित एवमन्वर्थत्वाश्रयणे यमानां मुखनासिकवत्त्वपक्षे संज्ञायामप्रवर्तनमपरि
भाषयानुनासिकविधिविधेयतान यमानामिति भावः वस्तुतोऽन्वर्थत्वस्यावश्याश्रयणीयत्वे सू ६०
त्राकरणमेव वक्तमित्याशयेनाह एतच्चेति दिगिति दिगर्थस्तु संज्ञापूर्वको विधिरनित्य इत्यस्यैव

प्रग्रह्यसंस्मे स स्यासुकाराद्यवम प्रवृत्ति संपादनार्थं सूत्रमिति प्राहुः तुल्यास्यप्रयत्नबोध्य इति यद्वर्ण
संबंधितास्याद्विप्रयत्नं सं बंधितास्यादिनातुल्यं तदिति फलितार्थः येनेत्यस्य यदीयेनेत्यर्थः असं
तीति असन्ने ऋवर्णे परत्वमिति यावत् तच्च व्यक्तिस्पोत पक्षे व्यक्तेर्नित्यत्वात् ककारादिव्यक्तेरेवैवेति
सर्वत्राभिव्यक्तिरेव कत्वादिजात्यंगीकारे तु व्यक्तीनामनित्यत्वादसन्नमुत्पत्तिरेवेति नारायणः
कैयटविरुद्धमेतत् अन्नेनेति अत्र पक्षद्वयेऽप्यं हते रूपं टिस्तोपात् तन्निषेधादिति यत्नोपस्या
सिद्धत्वात्स्थानिवत्वाभावेऽसिस्यपत्वोपस्येव न पदांते तत्र ग्रहणं छिंसमेतत् उदात्तादिषु स्या
न भागमात्राय सावर्ण्याभावो न शंक्यः शिक्षायां कंठत्वादिनास्थानत्वोक्त्या कंठत्वादिनैवास्य भ
वार्थिकास्य पदे न ग्रहणात् हृतिद्वयस्वीकारे गौरवाहाह त्रिपद इति विवक्षितमिति कंठत्वादि

नाभिन्नस्थानानामेकस्थानत्वाभावान्नसावर्ण्यमिति किंविवक्षयेति चिंत्यमेतत् यद्यपि स्था
६१ नत्वेन तुल्यत्वमस्ति तथापि तद्रूपेणोपस्थापकाभावान्न सावर्ण्यमपि योमित्वं तस्येति वोध्यं अ
त्र पक्षे सप्तम्यंतस्य सौत्र सर्वनिपाताभावकल्पने गौरवादाह यद्वा तुल्य इति साधुत्वस्य फलसा
61 ध्यत्वादत्र पक्षे गौरवादाह यद्वा आस्य इति प्राग्वदिति न द्वेरवा[illegible]पि चिंत्यं भाष्यस्थितमिति शि
ष्यसुपारनार्थमनेकपक्षोपादानं तु न तुल्याघवाद्यादर इति भावः यद्यपि कादिपंचानामेकस्था
नत्वात्तुल्यस्थानत्वानुपपत्तिः भेदघटितत्वात्तुल्यत्वस्य तथापि तत्तद्व्यक्तिगतभेदं स्थानेष्वारोप्य तु
ल्यत्वमुपपाद्यमिति केचित् वस्तुतस्तु तुल्यत्वं न भेदघटितं किंत्वेकधर्मवत्वं नन्वेवं घट इव घट ६१
इत्यापत्तिः एकधर्मवत्वरूपतुल्यत्वप्रतीतेः प्रयोजनसत्वेन तत्प्रतीतानिष्पत्तेः गगनं गगनाकार

ष्येत्याद्यवनन्वयेयथा अतएवोपमेयोपमा अनन्वययोरुपपत्तिः तेनतुल्यमित्यत्रेदमुपपाद्यि
ष्यतेइत्तप्राहुः तुल्यस्थानमितिकिमिति आस्यपरविशिष्टंकिमित्यर्थः सर्वप्रलेपेसाम्यंहीति अत्रा
यंसिद्धांतः प्रशब्देनवास्यप्रयत्नमुद्दासः स्थानांशेतुयावत्स्थानसाम्यमेवसवर्णसंज्ञायांप्रयो
स्पकेषामितिनिर्देशात् अन्यथासवर्णदीर्घोपपत्तिः अतएवैचोर्नैतौतुल्यस्थानावितिसावर्ण्यंनेत्यु
क्तंभाष्ये वलयोरप्यतएवनसावर्ण्यमिति नतद्धानिस्साहैतोष्ठ्यीतिन नचयावदास्यभवसुल्यत्वंवि
वक्षणेप्रयत्नग्रहणंअर्थं प्रयत्नस्याप्यास्यभवत्वादितिवाच्यं ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः
तयोर्जनकानामास्यभवानांवायुसंयोगानामतुल्यत्वात् तस्मादास्यभवानांकंठादीनामेवग्रहण
मितिबोधनायतत्सार्थक्यात् सामंजस्यादिति अणुदित्सूत्रेतुल्यास्यप्रयत्नस्यसंज्ञेत्यर्थेन आ

कारादीनांग्रहणसिद्धिः सवर्णपदघटितेषु सवर्णग्रहणानिनकर्त्तव्यानीतिलाघवंच कं आद्
६१ ति अत्रकंठपदंकंठस्थानकंठसमीपजिह्वामूलस्थानोभयपरंतेनकंआवहोजिह्वामूलेतुकुः
प्रोक्तइतिशिक्षयानविरोधः विसर्जनीयपदेनात्र अकारसाहचर्याद्काराश्रयस्यैवग्रहणं ते
नाश्रयस्थानभागिनइतिशिक्षयानविरोधः यद्यपिसर्ववर्णोच्चारणेकंठव्यापारे आवश्यक
स्तथापि चकाराद्युच्चारणेतालव्वादिव्यापारोप्यावश्यकः कचयोर्यावत्स्थानसाम्याभावान्नसाव
र्ण्यंभिन्नस्थानकथवैयर्थ्यापत्तेश्च दंत्साइति दंतपदंदंतसमीपदेशपरंतेनभग्नदंतस्यापिदं
त्यवर्णोच्चारणंभवतिदेशरूपस्थानस्यसत्वात् उपूपध्मानीयेति उश्चपश्च ध्मायतेशब्दोनेयेननतदुप ६१
ध्मानंतत्रभवइत्यर्थः अवहाराविप्रसंगस्तुन रूढेःगहादेराकृतिगणत्वाच्छः वकारइति ननु

ह्रस्वस्थानीय ओष्ठ्यस्थानीय इत्यर्थो वा समुदितं स्थानं वा नाद्यः वलयोः सावर्ण्ये तद्वत्त्विसा
ह्यैतोऽलीति परसवर्णप्रसक्तेः नान्त्यः अदुहु हीत्यत्र स्नुक्वादु हेति ह्रस्वे तद्विधीयमानो ऽस्नुकवस्य
स्यनस्यात् अत्रार्वाचीनाः विशिष्टं स्थानं ह्रस्वोष्ठ्यमिति विशिष्टाद्यातः करणात् स्नुक्लुनुवृ ह्रस्वे इति
निर्दिष्टात्रोपो ओरितिनु प्रोवकारः तेन वकारादेर्ह्रस्वे चेत्यर्थात्सिद्धः यद्वातावित्यवसिद्धे ह्रस्वग्रहणं
यथा कथंचिद्ध्रस्वसंग्रहार्थमिति न दोषः अथवाऽस्तु प्रत्येकं स्थानत्वं तथा वा सामिति निर्देशेन वलयोः
सावर्ण्याभावज्ञापनात्तद्वत्त्वित्यत्र न दोषः अत एवोष्ठ्यपूर्वस्येत्यत्र सुस्पष्टं प्रतीत्यत्र प्रवृत्तिः समुदित।
स्थानपक्षे तु पूर्वशब्दात्पूर्वं वकारप्रश्लेषेण साध्य उकार इति अत्र केचित् प्रत्येकमेव स्थानत्वं अष्टौ
स्थानानीति प्रतिज्ञाविरोधेन समुदितस्थानत्वोक्तेर्भ्रान्तप्रलपितत्वात् समुदितस्य स्थानत्वे प्रत्येकं प

रनुस्वारस्यापत्तेः शिक्षायां प्रत्येकं यत्नोऽसार्थत्वापत्तेश्च प्रतिपादितमिति अअ इति विधीयमानसंवृतस्या
६३ सिद्धत्वादित्यादिना चतुर्धेति यमानुस्वाराणामूष्मणां चैव विवृतं करणं स्मृतं तेभ्योऽपि विवृतावेङौ ता
63 भ्यामैचौ तथैव चेति शिक्षावाक्याद्विवृततरविवृततमयोः प्रतीत्या नाज्झलाविति सूत्रभाष्यादूष्म
णामीषद्विवृतत्वस्य प्रतीत्या चतुर्धेत्यसंगतमिति प्रतीयते तन्न नाज्झलाविति सूत्रेणैव विवृतत्वा
ख्यानामेषां सवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात् भाष्यमते तु समप्रयत्नाः एवं चैदैतोरोदौ
तोश्च न सावर्ण्यप्राप्तिः प्रयत्नभेदसिद्धसावर्ण्याभावानुवादकमेव नाज्झलाविति सूत्रमत एव तत
त्र वक्तव्यमिति भाष्ये नोक्तम् एषामाभ्यन्तरत्वं त्वोष्ठप्रभृतिकाकलपर्यन्तरूपास्यान्तर्गततत्तत्स्था ६३
नेषु जिह्वाग्रादीनां स्पर्शईषत्स्पर्शदूरावस्थानसमीपावस्थानरूपाभ्यन्तरकार्यकारित्वाद्वर्णसत्त्व

वह्नितप्राग्भावित्वाच्च बोध्यं एते चेति वर्णशब्देनात्र ध्वनिरुच्यते अतएव पूर्वं वर्णानामिति श्लो० ८ हृद्विम
नसि निधाय तदभिव्यंजकध्वनेर्वैसुक्तं एतेन आत्मा बुध्या· सोदीर्णइति शिक्षाविरोधाच्चिंत्यमेतदित्य
पास्तं वाच्याइति अयमत्रार्थः आत्मा बुध्यासमेत्यार्थान्मनो युंक्ते विवक्षया मनः कायाग्निमाहंति स
प्रेरयति मारुतं सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयत इति शिक्षा अत्र आत्मा अं
तःकरणं संस्काररूपेणस्वगतानर्थान् बुध्या स्वहृत्या समेत्य एकबुद्धिविषयान् कृत्वा तद्बोधनेच्छया
मनः युक्तं करोति तत इच्छावन्मनः कायाग्निं जाठरमग्निं अभिहंति सः कायाग्निः सोदीर्णः सः मारु
तः उदीर्णः ऊर्ध्वं प्रेरित इत्यर्थः एवं च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात्प्रेरितो
वायुर्वेगान्मूर्धपर्यंतं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य उक्तयत्नसहायेन तत्तत्स्थाने पुंजि ह्वाग्रादिस्पर्शपूर्व

कंतत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति ततोय -त्नविशेषेण गलविवरविकासादीन् करोति तत्रयेत
६८ त्तत्स्थानाभिघातकायस्तात्ते आस्यांतर्गततत्तत्कार्यकारित्वादाभ्यंतरा उच्यंते गलविवरविकासा
दिकाराश्चास्य बहिर्भूतदेशे कार्यकारित्वाद्बाह्या इति बोध्यं श्वासानुप्रदानाइति विवृतएव तस्मि
न्यद्योपरि वर्त्तमानाः श्वासा भवंति तदनुप्रदानमिता च स्पते विवृएव ते इति तदभिव्यक्तसुतरं जाय
माने कंठविवरविकासे तेषां कण्ठत्वविवक्षा बोध्या विवार एवां प्रयत्न इति भावः अल्पेत्विति वर्गतृ
तीय चतुर्थ पंचमास्तृतीयचतुर्थय माहकारानुस्वारो यरलवाइत्यर्थः नादभागिनः नादप्रयत्नकाः
अल्पासवः अल्पप्राणाः यत्न एतदुच्चारणोत्तरं प्राणानामल्पत्वमिव भवति यणश्चेति चेनाचामपि ६४
ग्रहणं सुपां सुलुगिति सूत्रेद्कारस्यांतर्यतोद्कार इति भाष्यात्क्षोषसंवारनादाल्पप्राणत्वमचां

अन्यथा तद्दीर्घपर्यायेण स्यातां अस्य प्राणत्वानंगीकारे दीर्घपर्यायेण स्यातां अनुपयुक्तादिति सूत्रे
प्रशब्दग्रहणात् उपयुक्तत्वे शवयोरपि सावर्ण्यं स्यादिति भावः उपयोक्ष्यंत इति पूर्वसवर्णविधि
विधेया व्यवस्था निरर्थकमित्यर्थः नत्वन्यतरेति तथा सति संवत्सरशब्दादौ सकारे परतस्तका
रस्य तोलीति परसवर्णो सकारः कदाचिन्न स्यादिति प्राकुः प्रतिपादितमिति · ऐ औ जिति सूत्रा
रंभसामर्थ्यादित्यादिना नहि यावदिति अयंभावः यत्किंचित्स्थानैक्यमेव सवर्णसंज्ञायां गृह्यते न
चवुरादिपंचानामपि परस्परं सावर्ण्यं स्यादिति वाच्यं आस्यवहिर्भूतत्वेन नासिकायाः सवर्णसंज्ञाया
मास्यपदेनाग्रहणात् आस्यांतर्गतेति मतेपि प्रयत्नसाहचर्येण वर्णोत्पत्तिप्राक्कालिकवायुसंयो
गाधारस्थानस्यैवग्रहणेन नासिकाया वर्णोत्पत्त्यनंतरं गुणोत्पादकत्वेन नास्यपदेन नासिकाया प्र

तलमित्याशयः नचैवं वलयोरिकारेकारयोश्च सावर्ण्यापत्तिरिति वाच्यं यत्तुष्ये वेषामिति तद्धानिर्दि
६५ निर्देशेन चाधिकस्थानेन सावर्ण्याभावज्ञापनेनाहोषात् एकारवकारयोश्चा— कंठदंतं नस्याधि
65 कस्थानत्वात् एका———रयोर्यथानद्यो———थो कंठ्यं कुइ———कुः वस्तुतो यावत्स्थानैक्यये
घविवक्षितं सवर्णसंज्ञायां कङयोस्तु न दोषः आस्ये तुल्यप्रयत्नं सवर्णमिति वार्त्तिके किमास्योपादा
नप्रयोजनमिति प्रश्ने प्रयत्नो विशेषणं मास्योपादानमित्युक्तम् घावर्णत्वेन बाह्यप्रयत्नान् प्रदर्श्य
यथा तृतीयस्तथा पंचमः आनुनासिक्यमेषामधिको गुण इति भाष्ये गतस्य बाह्यप्रयत्नत्वोक्तपात्र
सूत्रे नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहणाद्वोदनादिति भट्टाः अनुना ६५
सिकाकाराहीनां तु कंठाद्यवच्छिन्नवायुसंयोगेनोत्पन्नेषु कारादिषु नासावच्छिन्नवायुसंयोगेन गुणोत्प

स्यान्तेषां नासिकास्थानं अत एव भेदकत्वाद्गुणस्येति भाष्ये गुणपदेन व्यवहृतं इति भाष्यानुसारिणः

यवलानामिति कंठ्यावहाविसर्गादि शिरस्यायमेषां नासिकास्थानानुमोरिरं चिंसमिति प्राहुः सवर्ण

विधिप्रेति आचल्वर्णं ऋलिविग्रहः ऋरेसक इति प्रकृतिभावः नसंभवतीति दीर्घलृकारस्यावि

द्यमानस्याभावात् गानरोद्रनादे सत्वे पिशाच्यानुपयोगित्वात्तस्येभिभावः ऋदृति ऋद्वेति अत्र सव

र्णपदं सूत्रस्थमनुवर्तते तेन ऋद्धकारेनास्य प्रवृत्तिः वार्त्तिकद्वयविधेययोरद्रउरास्त्रानंतरं

पाठादरत्वं तेन तयोः स्थानेस्तुतोनणत्वाच्च तयोर्नरपरत्वं द्विमात्रोयमिति सूत्रेणैव सिद्धमा

सेतद्वचनयोः प्रत्याख्यानात् इति भावः द्वौरेफाविति द्विरेफत्वे हि रेफद्वयवति स्थानिन्यपरेण

कारवतिपर इति अवस्था सिध्यति प्रत्याख्यानभाष्यमेवात्र मानं अभित इति उभयतो भावेऽभिः

ह्रेरेफादिसनुषज्यते तच्चाभित इति पदयोगात् द्वितीयान्तं अजन्तोरिति वर्णैकदेशानां वर्णग्रहणेन
६६ ग्रहणमिति यस्ते प्रातऋद — तमित्यत्र रीरीत्यस्य तत्त्वलृकारद्वयसाहित्ये तौ लीत्यस्य चरशं कासमाधानयोर
66 करणेन ह्रस्वलृकारे यणप्रसक्त्या ध्व ऋकारलृकारयोरजभागस्याभितः ह्रुमत्वेन तथैवोचितमि
तिभावः ईषत्स्पृष्ट इति अन्यथा सूत्रेणैव सिद्धे वचनद्वयं व्यर्थं स्यादिति भावः ह्रौ लकाराद्वितिरेफ
इव सूर्वसाहचर्यादिति भावः अभित इति लकारादिसनुषज्यते अमात्र इति ईषत्स्पृष्टत्वादि
त्यर्थः वार्त्तिकद्वयेपि व्यवस्थितविभाषाते न ह्रस्व ऋवाकारद्वयस्थानिकैकादेश एव पूर्वस्य सा
धुत्वं ह्रस्वऋकारलृकारस्थानिकैकादेश एवोत्तरस्य साधुत्वं अत एव स्नृतिन ऋकारः नाप्लृ ६६
तिलृकारः न परकरणे न परभूतस्यैकस्य दीर्घस्य व्यावर्त्तनेपि पूर्वस्मिन् दीर्घप्रहणेर्दुर्वारत्वात्तय

दृतदृतीयेतदृत्तइति वक्ष्यामीति सावर्ण्यं न कर्त्तव्यमिति तुल्यास्य सू॰त्र भाष्योक्तपक्षेपरस्मिन्दी
र्घे सति अस्यप्रहृत्ते दुर्वारत्वादिति बोध्यं ननु वचनद्वयारंभे सावर्ण्यसंज्ञाया अभावात्सूत्रे ऌत
दृभावे दीर्घप्राप्तिरत आह समुच्चयार्थ इति निवृत्तमिति सवर्णत्वाभावादृकारस्येति भावः प
ठनीयो इति अइउण्सूत्रास्यरचेत्यर्थः केचित्तु ऋदन्त्र कि सूत्रे ऋकारं विहृतं पठित्वा ऌकार ईष
त्स्पृष्टः पठनीय इत्याहुः इदं ऋकारे षत्स्पृष्टत्यागेन न मुक्तमिति चिंत्यं ईषत्स्पृष्टस्थानत्वादिति अ
न उक्ताद्विति शेषः तत्वन्मात्रेण अस्वसंज्ञामात्रेण अनिर्वाहात् इति अणसेवमप्रहृतेरित्यर्थः एकमा
त्रत्वापन्नस्पर्शेनार्धस्य नभिधानात् एतेन दीर्घपाठे गौरवाद्हस्व ईषत्स्पृष्ट एव पठनीय इति एतद्धि
धेयो पठनीयाविस्पष्टशुद्धमित्यपास्तं विवृतस्य स्थानि न इति एकत्वमविवक्षितं स्थानिनोः स्थाने

इत्यर्थः हीर्घाविति ऌकारे परतोपि ऋकार एवेति द्विवचनोपपत्तिः अन्यथा ऋकारमात्रे स्थानिनिर्द्द
६७ 67 योरनिष्पत्तेर्द्विवचनमसंगतं स्यादिति बोध्यं रूपद्वयस्येति विहन्ते षद्द्वि वृत्त घटितस्येत्यर्थः गौरव
स्येति अणनुपाठस्य वर्णत्वेनेत्यर्थः रपरत्वेति संज्ञयाल परत्वासिद्धेरिति भावः रमतसाहारेति उ
रणसूत्रेइति शेषः धातूपदेशइति विभिन्नानुबंधकरणेपि विधिषु केन ऋकारेण ऌकारेण वाऽनुवा
दे संकरो दुर्वारः एवंविधोपृथगनुवादे धातूपदेशे एकानुबंधेप्यसंकरो दुर्वार इत्युभयोपादानं त
थाचाभयोरत्र पृथग्रूपेण निर्देश सामर्थ्यादसंकर इति भावः एक सामर्थ्येनासंकरो दुर्वार इति तत्वं
नास्मत्तो स्वचयेदिति तत्राशक्यं वदान्ति हकारयोरपि सावर्ण्याभावे रंड । अन्नामिति व्यस्तस्य यो ६७
गापत्तेः यद्यप्यकारे गुणप्रहस्यानदोषः तथापि श्रीशाइसाहो पक्षे पणपत्तिः दधी हमित्याशेषस्ये

इको सवर्णे इत्यापन्नेऽश्वेत्यादिबोध्यं इष्टसिद्धिरिति पूर्वसवर्णाभावेपि सोऽत्र प्रयोगापन्न इत्यर्थः परिशे
षात् सजातीयैर्निषेधाभावे विजातीयैरेव निषेध इति भावः स्वरोऽस्वरीति हलामनिषेधे ज्ञापनमा
त्रेण सार्थक्यात्कथमत्र — — परस्परं निषे — — धे ज्ञापकमिति चिंत्यं उक्तत्वादिति अइउण्सूत्रे अस्तु
वेत्यस्य चिः न ह्रीजत्वे तादृशगौरवस्य दोषानापादकत्वान्मात्रालाघवाभावात्राधिकसंग्राहकमणव
हलं स्यर्थमेवेति मात्वा लाघवाभावेपि व्यक्तिलाघवायाह वस्तुतस्त्विति एकारः शुद्धतालव्यः ओ
कारः शुद्धोष्ठ्य इति मते इकाराकारशकारयोः प्राप्तसावर्ण्याभावायात्र यहलमिति सूत्रद्वयं यत्नु
ष्ठ्यकेषामिति निर्देशादेकारैकारयोर्न सावर्ण्यमिति बोध्यं · इकारादिभिरिति नटस्थस्यस्य ज्ञाविमत्रे
वत्रापि यहलसंभवादिति शंकार्थः दुर्वारत्वादिति अस्मिन्काले निषेधकाभावादित्यर्थः मिति · शार्त्रे

यत्ताज्झ्स्याविस्यस्य वाक्यार्थबोधोन्तरमनेने कारशाकारयोरिव शकारयोः संज्ञानिषेधो न तु ततः श्रा
६८ —तिभावः अनचीति द्वित्वे नेत्यर्थः। इयमिति निसंज्ञरोऽसरीति लोपेन शकारप्रतिषेध इति शकार
68 योरिति द्विवचनांतेन समासः भेदाधिष्ठानत्वात्सवर्णसंज्ञायाः प्राप्नोतीति शेषः अज्झन्त्वादिति अ
स्पृष्टे कारे णत्वहीनत्वात् चत्वं हल्त्वेषु याच्च हल्त्वमिति भावः शिक्षावाक्य इति तथा च शिक्षास्व
राणामूष्मणां चैव विवृतं करणं स्मृतं तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव च इति इयं च व्यापकध
र्मबोधिका सामान्यतः एतदुत्तरं व्याप्यधर्मबोधिका तथा हि अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः श
लः स्मृताः शेषाः स्पृष्टा हलः प्रोक्ता इति अस्यार्थः अचोऽस्पृष्टाः स्पर्शाभावरूपविवृतत्ववंतः ६८
यणस्त्वीषदिसनेन तेषामीषत्स्पृष्टत्वमीषद्विवृतत्वं च बोधितं नेमइ सर्थे तेन शलामीषद्विवृतत्वं य

लपेक्षयाधिकविवृतत्वं चेति बोध्यं अत्र शिक्षोक्तव्याप्यधर्मवत्तां व्यापकधर्मं हाय न सावर्ण्यमिति
तियणं चवर्गादिभिर्न सावर्ण्यं तेनांचिताद्येन यकारादिः परसवर्णः योगो विभ्यते इति इस: पूर्व
मिषत्सद्घटितः कथं पाठः कथं चानुवृत्तिरिति चिंत्यं सांप्रतशिक्षापाठे तथानुपलंभात् पाठांतरं
वाम्यमिति प्राकुः सिद्धमिति प्रतिषेधाभावरूपमिष्टमिति शेषः प्रयत्नभेदात् शरां सावर्ण्यं परस्य
रमनिषिद्धय्यकारे हलन्त्वाद्दन्डागमसुक्तो दोषः स्यादत आह उपलक्षणमिति अहल्त्वादिति प्रय
त्नभेदादकारहकारयोः सावर्ण्याभावादित्यर्थः अभ्युपेत्येदमिति इदं शरामनच्त्वादित्यादि प्र
यत्नभेदात्स्वाग्रसावर्ण्याभावानुवादार्थं सूत्रमित्यर्थः अनुवादार्थमनावश्यकं सूत्रमित्याह व
स्तुतस्त्विति इहपूर्वमिति नाज्झलाविति सूत्रयदटका च्यदार्थज्ञानस्य प्रत्याहारनिष्पत्ते मारांभ

वात्र प्रत्याहारनिष्पत्तेरादिरंत्येनेति सूत्रजन्यबोधाधीनत्वेन तद्बोधकारणीभूततत्तद्घटकाद्यंतपदा
६९ र्थोपस्थित्यधीनत्वेन तदर्थज्ञानाय वर्णोपदेशणपेक्षेति सर्वतःपूर्वमुपदेशो रचर्णानामितिभावः इ
69 त्संज्ञकज्ञानाधीकने स्वघटितसूत्रबोधोपकारकत्वात्पूर्वं इत्संज्ञेत्याह तत इत्संज्ञेति बाधक
संभावनयातुल्यास्य सूत्रजन्यवर्णपदार्थबोधे ऽप्रामाण्यसंदेहेनाणुदित्सूत्रार्थोपयोगिसावर्ण्यप
दार्थनिश्चयाभावात्तत्सूत्रार्थानिष्पत्तिरिति तन्निर्णयार्थं बाधकविषयपर्यालोचनमावश्यकमि
ति बाधकसूत्रघटकपदार्थपर्यालोचनकाले अच्हल्रूपपदार्थोपस्थितौ विलंबकारणाभा
वाद्वाक्यार्थनिष्पत्तिरित्यभिप्रायेणाह इत्येतद्वाक्यार्थबोध इति बाधकविषयज्ञाने सर्वेणपदा ६९
र्थनिर्णये ऽणुदित्सूत्रेण ग्राहकतेति भावः एतेनाचारवाक्यार्थविषयालोचनस्य प्रकल्प्य चापवा

द्विषयमितिन्यायेनावश्यकत्वेप्यथो बादरवाक्यार्थो नपेक्षणादिदं कथमिति चिंत्यमिति परास्तं वा
कार्थविसंवेमानाभावात्प्रतिबंधकाभावाच्च सूत्रनिष्पत्तीति सूत्रघटकपदार्थपर्यालोचनसमये द्रुत
र्थः अन्यथा पदार्थोपस्थितिकालेपि निषेधस्वीकारे न निष्पन्नमिति न तत्रक्ष्या संस्कारोपयोगि लक्ष्य
संस्कारार्थं हि सवर्णसंज्ञास्यापवादविषयपर्यालोचनमिति भावः इत्याहुः कथं नेति सवर्णपदार्था
ज्ञानादित्यर्थः दीर्घोपीति सवर्णपदार्थज्ञानाभावादकः सवर्णे इत्येतद्वाक्यार्थानिष्पत्तेरिति भावः
उत्तरकाले इति तदुत्तरमकः सवर्णे इति सूत्रार्थबोधोत्तरं लक्ष्यसंस्कारकाले इत्यर्थः अविशेषात्
इति अकः सवर्णे च परत्वरूपधर्माक्रांतत्वस्य सर्वत्र सर्वत्र सत्त्वादित्यर्थः बोधानुपपत्तिरिति साधुत्व
ज्ञानस्य शाब्दबोधकारणत्वात् दीर्घोप ह्रस्वासाधुत्वाभावेनेत्यर्थः विलंबादन्तोदिति गगयांदिपदेभ्यो

प्यर्थोपतिदर्शनेनपदार्थोपस्थित्यादिकारणसत्वेवाक्यार्थबोधेप्रतिबंधकाभावात्साधुत्वज्ञानस्या
७० चाप्रतिबंधकत्वाद्धेतुत्वेमानाभावइतिभावः नचगगर्यादिपदेभ्यः साधुशब्दोपस्थितौबोधइतिवाच्यं
70 साधुशब्दाज्ञानवतोबालादेर्बोधदर्शनेनसाधुस्मरणाद्बोधइत्यस्यासंभवात् अन्यथा साधुत्वज्ञान
स्यकारणत्वे आत्माश्रयेति अर्थवत्सूत्रघटकपदेष्वर्थवत्सूत्रप्रवृत्तेरित्यर्थः अन्योन्याश्रयेति अर्थ
वत्सूत्रंविनाप्रत्ययइतिरूपानिष्पत्तिः प्रत्ययइतिसूत्रार्थंविनाप्रातिपदिकमितिरूपानिष्पत्तिरि
त्यर्थः चक्रकेति अपसूत्रांतर्गतप्रातिपदिकपदेऽर्थवत्सूत्रघटकसूत्रप्रत्ययइतिसूत्राणांप्रवृत्त्याच
क्रकमित्यर्थः अनुमितिरिति इदंवाक्यंसाधु अभियुक्तवाक्यत्वादित्येवंसाधुत्वज्ञानमित्यर्थः दि ७०
गिति दिगर्थस्तु अनुमित्यादिकल्पनेमानाभावः इत्यादिसाधुविचारेनिरूपिते शब्दसमाध्यंतरमाह

वस्तुतस्त्वित्ति ननुशरोचीतीति इकारशकारयोः सावर्ण्यान्नइति — —याःभावः इहृमलुदित्सूत्रप्रत्यत्रि
मंगीकृत्य वस्तुतः उत्पद्यमाननाडम्भः नाविरोधेन तद्वाक्यार्थेन सावर्ण्यनिषेधादिकारे शाशकाराग्रहणेन
नाचत्वमित्याह शकाराग्रहणादिति ननु सावर्ण्याभावे कथं लोपोऽत आह अनच्चेति ननु लोप
स्यापि सत्वान्न कदापि त्रिशाकारकं रूपं सावर्ण्याभावे तदपि स्यादत आह लोपस्येति विकल्पानुवृत्ताव
तरेव भाष्यं मानमिति भावः असतीति परसंतोषाय वस्तुतो निषेधाप्राप्तिरेव स्युक्तं व्याख्यायेति
अनच्त्वात् शकारयोः सावर्ण्यसिद्धं कथं शकारस्यानच्त्वं तत्र हेतुः वाक्यापरिसमाप्तेरिति उक्ता
वाक्यापरिसमाप्तिरित्येवमित्यर्थः नन्वेवं वार्त्तिकार्थे क्रियमाणे वाग्रहणमनुपपन्नं हेत्वंतराभावादत आ
ह अस्तु वेति प्रतिज्ञेति वार्त्तिककृत्कार्थाभ्युपगमेऽपि न दोष इति भावः फलाविशेषेऽपि शर्षु इति शेषः

प्रागुक्तेति अकारहकारयोरपि सवर्णत्वादकारेणाकारग्रहे हल्त्वादकाराणांपरस्परं सावर्ण्येन स्या
७१ दितिरीसत्यर्थः अस्मिपूर्वइस्से तदर्थमकुग्रहणं एतेनेकइति वाच्येऽकुग्रहणसामर्थ्यादकारेण अ
कारग्राहकस्तेन हंडाग्रेन हो षड्तीरंचिंसं किंच परः शतादौ नास्मत्नाविति निषेधाद्द्वित्वनिषेधाभाव
वद्दिदमपि सिद्धमिति परास्तं निष्पद्यमानवाक्यार्थेनैव सावर्ण्यनिषेधबोधनेन किंचेस्यादेरताधि
लसितत्वाच्च मात्रालाघवाभावेपि अधिसंग्राहकपदकरणस्य नाज्झलाविति सूत्रसिद्धत्वाच्च॰
निमूर्लनइति निर्युक्तिकइत्यर्थः षत्वंस्यादिति इदंचिंसं षत्वस्यासिद्धत्वात्संयोगांतलोपस्यैवउचित
त्वादिति वस्तुतस्तु संयोगांतलोपे सति नकारादिणः परस्य षत्वं स्यादित्यर्थोपलक्षणमिति यथा कर्षं ७१
चिकीर्षमाणेयं ढत्वमिति आकारोपदेशस्तु सूत्रिसार्थकः अत्रापि ढत्वस्यासिद्धत्वात्संयोगांतलोप

एवमुक्तमिति चिंत्यमिदं भट्टास्तु हकाराकारयोः सावर्ण्ये सति यद्यत्स्थानी प्राप्नोति तस्य सर्वस्यापवादत्वे हलग्रहणमिदमित्याहुः वस्तुतो दोषानुद्धाराच्चिंत्यमेवेदं वाग्भगशीर्षित्यत्र रत्वमपि बोध्यं घकार इति आशीः

शब्दाकारस्यैव सर्वः आकारांतस्य पदत्वाभावान्न संयोगांतलोपद्रुतः गासीध्वमिति रुत्वं स्यादित्यपि बोध्यं उत्वं स्यादिति पूर्वसूत्रे अतीतिपरकरणसामर्थ्येनाप्यस्य सुवा रत्वाच्चिंत्यमेतदिति केचित्

आहुः परांतादित्यत्रैव नपरकरणस्य सार्थकत्वात्स्व आगं तेस ताविह शिवे सस्य प्राप्त्यागतो रोरित्यत्र च तपरकरणाभावाच्चिंत्यमेव चिंत्यं यत्वेऽपि तु इति संयोगांतलोपस्तु यत्वस्यासिद्धत्वान्न प्राप्नोतीति सर्वः मत्वेत्विति नुतास्तु चिः तद्वीजं त्वत्र सूत्रे जातिपक्षाश्रयणेन शकारेकारयोरेकाज्यात्स्यान्तांतत्वाभावाद्जभूरित्यादिवार्त्तिकासंभव एवेति व्यक्तिपक्ष एव संमतो तस्मिन्पक्षे समाधिमाह य

देति ——ननुप्लुतस्यासिद्धत्वान्न रत्वं ई३ पुत्रं ढत्व इत्याप्रतस्यासिद्धत्वात्तदेव युक्तमिति चेत् शोषोप
१२ 12 लक्षणमेतत्सर्वं नत्वयमेव दोष इत्यत्राग्रह इति सूचयन्नाह अवधेयमिति॰ इति चतुर्थाह्निकम्॰
ई३ देत द्विवसंज्ञाविधौ तरंतविधिप्रतिषेधादाह द्विवचनमिति व्यपदेशिवद्भावेनेदाद्यंतत्वमुदाहर
णेषु जातिःपदार्थोऽभेदकाः गुणा इति पक्षे आह असंदेहार्थमिति प्लुतसंग्रहस्त्विष्ट एवेति तात्पर्यं
न त्वतः प्लुतासंग्रहेऽपि न दोष इत्यग्रे स्फुटं व्याहकृतासिद्धेरिति एवं रचेकारांशोऽसंदेहार्थमेव तत्पर
त्वमिति भावः इतिहि तयेति गुणांतरयुक्तसंग्रहार्थमित्यर्थः सुवचमिति॰ किमर्थमीदादीनां तपरा
णां प्रगृह्यसंज्ञेति भाष्ये णत्रि ॥ पितपरत्वप्रतीतेर्भाष्यविरुद्धमेतदिति तु न शंक्यं॰ बहुवचनस्य तास १२
रत्वेन एकारस्योपपत्ते स्तुत्रिन्याये नोपपत्ते रेकारस्यात परत्वेऽपि भाष्याविरोधात् असंदेहायेति इत्यंश

गुणनामभेदक त्वेत द्वि [illegible] त्वस्य भेदकता चिंत्यमेत दिति कश्चित्॥

ति पक्षे एवात्राभिप्रायेण जातिपक्षे सर्वाभिप्रायं व्यावर्त्तयेदिति व्याहृतिरिहाग्रहणमेव बोध्यं अथा
यमिति इ इ इत्यंशे गुणान्तरयुक्तग्रहणत्वभेदकपक्षेणेति भावः अनण्त्वादिति एवं च प्लुतासंग्रह इति
भावः जातिपक्षाङ्गीकारे तु पूर्वदोषाभावेपि दोषान्तरमाह जातिपर इति दीर्घत्वसमर्थनीयत ई त्वादि
जातीमनङ्गीकृत्य सदृशजातिमभ्युपेत्याह विवासितेनेति गुणान्तरयुक्तसंग्रहत्वभेदकपक्षाश्रयणेने
ति भावः प्रतिबन्धे हीति तत्करणाभावे अप्लुतस्य विधौ प्लुतप्रतिषेधः फलतीन श्रवणं न स्यादिति
वार्त्तिकार्थः सिद्धां संज्ञेति एवं च नानुनासिकः इमग इत्यत्वादिति भावः सिद्धत्वेनेति त्रिमात्रवृद्धेः सत्त्व
न हि मात्रत्वाभावात्संज्ञा न स्यादिति भावः एतेन यथोद्देशपक्षाश्रयणेन प्लुतासिद्धत्वेन प्रवृत्तेति भाव
इत्यर्थः व्याख्यातः । सिद्ध इत्यर्थः प्लुतस्य सिद्धत्वं त्वचु संधौ नान्यत्रेत्याह संज्ञां प्रतीति कथमत आह

यथोद्देशेति॰ संज्ञां प्रतीति प्रकृतिभावं प्रति सामर्थ्यात्प्लुतस्य सिद्धत्वे सति न तस्य त्रैकवाक्यतापन्न संज्ञां प्रत्य
७३ 73 पि सिद्धत्वं स्यादित्यभिमानः प्लुतस्यानिनः प्रकृतिभावविधानेन प्रकृतिभावं प्रति सिद्धत्वाभावे संज्ञां प्र
ति सिद्धत्वेन मानमित्याशयेनाह वीजाभावादिति वाक्यांतरेति प्लुतः प्रकृत्येति सूत्रं प्रति प्लुतो नासिद्ध इ
टिप्पणिके यं पूर्वत्र भस्य मध्ये पातिता ति ॥ ति वाक्यांतरे इत्यर्थः पूर्वत्रासिद्धमित्यस्याभाव--क वाक्यांतरे त्यर्थः वस्तुतस्तु प्लुतः प्रकृत्येति वाक्यं
प्रति सामर्थ्यात्सिद्धत्वेपि मगृह्यः प्रकृत्येत्येतद्वाक्यं प्रति सिद्धत्वेन मानमित्याह अस्त्वेवेति अपक्षयेति॰ त
न्मूलक पूर्वत्रासिद्धमिति वचनवाधापेक्षया चेति वोध्यं॰ विशेषेति पुंविशेषोपस्थापकवाक्यरूपप्रमाणा
पेक्षया सामान्योपस्थापक प्रकरणरूपस्य दुर्वलत्वात्॰ शक्यत्वेपीति कार्यकालपक्षे प्यसिद्धत्वादेव प्रकृति ७३
भावः सिद्ध इति भावः कार्यासिद्धत्वमाश्रित्याह अत्र हरदत्त इति सिद्ध एवेति तस्य च न संज्ञेति स्यादेवात्

नासिकइत्यर्थः संज्ञा तु प्लुतात्प्रागेवेत्यभिमानः एतेन प्लुतस्यासिद्धत्वेपि द्विमात्रस्य प्लुतेन निवर्त्तितत्वात्क
थं संज्ञाप्रवृत्तिरिति शंका परास्ता संज्ञा ह्यतेति ग्रंथस्वारस्येन पूर्वं प्रवृत्तेरेवतदभिमतत्वात् द्विमात्रत्वनिमित्तसंज्ञा
या अननुवृत्तिधर्माऽन्तत्वान्नसा स्थानिवत्त्वेनेत्याह अचिविधित्वादिति संज्ञायां विशेषणत्वेनानाश्रय
णादिति भावः अवश्यमिति अन्यथा प्लुतस्यासिद्धत्वेन प्लुतस्य दीर्घेणानिवृत्तत्वाद्दादेशप्लुतश्रवणं स्या
दिति भावः स्थानिनमिति द्विमात्रमेवेत्यर्थः प्लुतात्प्राक् संज्ञाफलाभावान्न प्रवर्त्तते अनुनासिकपदस्य
र्थं तु पूर्वं न सा संज्ञायाः पूर्वं प्रवृत्तावपि प्लुतस्यानुनासिकविधिं प्रति सिद्धत्वेन तस्य चाग्रह्यत्वे न तस्य
सुलभत्वात् इत्यभिप्रायेणाह अत्राहुरिति शास्त्रासिद्धत्वेति यद्यपि शास्त्रमंतरंगत्वात्प्रवृत्तं प्लुतश्च प्रवृत्त
स्तेन द्विमात्रस्याभावस्तथापि शास्त्रं न प्रवृत्तमिति बुद्ध्या प्लुतत्वबुद्धेरभावात् वस्तुतस्त्रिमात्र एव द्विमा

तप्लुत[illegible]योर्युगपत्प्राप्तावपि सिद्धत्वबोधकशास्त्रेणास्वरूपसिद्धशास्त्रस्यासिद्धत्वेन बोधयितुमशक्यत्वेन स्वनिष्ठाप्यद्वारा
सिद्धस्याप्यसिद्धत्वबोधनासंभवात् असिद्धत्वबोधनात्कार्यप्रवृत्तावपि बोधितेव तथापि शास्त्रं न प्रवृत्तमिति बुद्धेः शास्त्र
स्यासिद्धात्सत्वेन प्लुतबुद्धेरभावात् द्विमात्रबुद्धिरिति भावः ॥

त्रबुद्धिराहार्यारोपरूपेति भावः नियतइति एतेन वस्तुतइति पक्षे प्लुतेनस्थानिनो विनाशात्प्लुतासिद्ध
७८ त्वेपीकथं टीघ्रेयासङ्गस्य संज्ञेतिशंकापरास्ता आहार्यारोपेण द्विमात्रबुद्धेर्द्विमात्रे एव सत्वेनसंज्ञा
75 प्रवृत्तेः स्वरूपापादकत्वात् अतएव आहार्यारोपादेव तदुपजीवनेन मुख्याबाध्ययेन समाहितमिति
उपजीव्यविरोधस्यायुक्तत्वमितिन्यायमूलकेन तद्विभाषासङ्गत्या चासिद्धत्वं न प्रतिबंधकमिति मुख्याबा
सिद्धत्वेपिनदोषइति भावः नत्विहद्विमात्रेइति ननुसंज्ञाप्लुतयोर्युगपत्प्राप्त्योः प्लुतस्यासिद्धत्वात्सं
ज्ञैव पूर्वं प्रवृत्तान प्लुतः नच परत्वात् प्लुतइतिवाच्यं पूर्वत्रासिद्धीयेनास्ति विप्रतिषेधइति सिद्धांतात्
नच कार्यकालपक्षेनुनासिकविध्येकवाक्यत्वेन तद्देशस्थत्वेन परत्व — संज्ञास्यादिति वाच्यं तत्पक्षे ७४
पि पूर्वत्रासिद्धीय ---- सत्वेन विप्रतिषेधाभावात् प्लुतस्यासिद्धत्वेनैतत्पक्षे प्लुते संज्ञाया दुर्लभ

त्वाच्च प्लुतसंग्रहः यथोद्देशपक्षे कार्यकाले परत्वोपपादनस्यार्थासाधकत्वाच्च एवं च द्विमात्रे ए
वसंज्ञाप्रवृत्तौ ततः प्लुते स्थानिवत्त्वेन वत्रिमात्रे प्रगृह्यत्वमानेयं तच्चानल्धर्म इति कथं नानल्विधावि
ति निषेधाप्राप्तिरिति चेन्न अत्रोच्यते यथोद्देशपक्षो नाम भविष्यति किंचित्कार्यमग्रे इत्यभिसंधाय सं
ज्ञाप्रवृत्तिः तच्च कार्यं संज्ञाप्रवृत्तेर्वचयत्सिध्यति तदेव ग्राह्यं यत्कार्यं संज्ञाया अप्रवृत्तावपि सिध्यति
न तु न ग्राह्यं उद्देशपदस्वारस्येन स्व-- इति मात्रसाधस्य ग्रहणात् एवं च प्लुतात्पूर्वं संज्ञाप्रवृत्तौ
प्लुते संज्ञा न सिध्यतीति पूर्वसंज्ञाया अप्रवृत्तिरेव अनुनासिकप्रवृत्तिस्तु न फलमित्यग्रे वक्ष्यते एवं चा
सिद्धस्यापि प्लुतस्येव पूर्वं प्रवृत्तिः तस्य चासिद्धत्वात् द्विमात्रबुध्या संज्ञेत्येव वाच्यमिति नानल्विधाविस
स्य पूर्वत्रासिद्धीयेनास्ति विप्रतिषेध इत्यस्य चाविषय इति प्राञ्चः ननु द्विमात्रोऽयमिति बुद्धौ कथं त्रिमा

त्रो विषयः अन्यविषयकबुद्धावन्यस्याविषयत्वादिति चेन्न आहार्यबाधकालीने छाजन्यज्ञानेत
९५ था कूमत्वान्नदोषइत्यभिप्रायं प्रकाशयन्नाह नहिरजतेति अनाहार्यज्ञानस्यप्रवृत्त्यादिहेतुत्वेप्य
७५ त्रपूर्वत्वासिद्धमिति शास्त्रप्रामाण्याद्दाहार्यस्यापि प्रवृत्तियानिर्वाहकत्वकल्पनमित्याह इहत्विति च
क्ष्यतीति स्वचत्र्योभाष्यकारइति शेषः एतेन शास्त्रासिद्धत्वाश्रयणेनउद्धृतमिति त्रिमात्रस्यैवद्वि
मात्रत्वग्राहकप्रत्यक्षत्वान्नतस्यैवानुनासिकधर्मेरितिभावः इति। स्थलइति एकतरपक्षएवसकलत्व१
क्ष्यसिद्ध्येइति शेषः दिगिति दिगर्थस्तु सामान्यापेक्षापकाश्रयणेप्लुतस्यानुनासिकोगुर्वादिरितिन
त्राश्रयणं व्यर्थमिति किंच सामान्यापेक्षत्वे अग्निीइत्यत्र प्लुतवज्रावेपिप्लुतस्यासिद्धत्वात्प्रगृह्यत्व ९५
न्नस्यादिति दीर्घोगुर्वादिः प्लुतप्रश्लेषाश्रयणेतुनमानं किंच प्लुतप्रश्लेषे ज्ञापकवैयर्थ्यंचस्यादिति बोध्यं

द्विवचनांतमिति संज्ञाविधाविति निषेधस्तु यत्र प्रत्ययं तस्येन तदा विशेषणत्वं तत्रैव धर्मिग्राहकमा
नान्तथैव कल्पनात् इहतु द्विवचनांतं विशेषणं नच ईकारादेर्विशेष्यत्वात्कथं तदंतविधिरिति वाच्यं ७८
शाह्रूपं विशेष्यमादायतदंतविधिरित्यभिमानेन शंकासत्वात् वस्तुतस्तु सामान्यनान्तरं तद्विधप्रभा
वज्ञापनेनांतग्रहणसार्थक्ये विशेषापेक्षज्ञापकत्वे मानाभावः किंचेहेह्रूपविशेष्यमादायतदंत
विधिः समेवगमके अतएव द्वंद्वे चेतिज्ञापकोपन्यासद्रूत्यादि दूषणसत्वेपि शंकितानुसारेणाहोवमाह
कुमार्यैरिति सामान्यापेक्षज्ञापकमित्याशयेनाह संज्ञाविधाविति ईकाराद्यंतमिति नच द्वयोः पारार्थ्यात्
थं परस्परं संबंध इति वाच्यं गुणानामपि प्रधानस्यैव ह्रूपकारार्थं परस्परसंबंधस्वीकारात् प्रधानोपक
रश्च कुमार्यगारादौ संज्ञायामप्रवृत्तिरिति केचित् वस्तुतोनुपसर्जनादिस्यादौ विशेषणानां संबंधस्य ह्रु

मत्वात्र कृते द्विवचनमीशादीनां विशेषमिति तदंतविधिः ततः प्रत्ययग्रहणेऽपि तदंतविधिरिसेत
७६ तत्स्य सूत्रा कूलमिति प्राहुः स्नोपादिति एतन्मतमुक्तं प्राञ्च इत्याहुरिति एकवचनेनाकृचिः न ह्यजंतु
76 शावात्य ग्रहणसंबंधेनानाभावः किंच भाष्यपतिगणितातिरिक्तव्यवस्थितद्वि भाष्य ऽ स्यामाणि
कीति सर्वत्र विकल्पापत्तिरिति आहुरिति दृष्टांतबलेन सरवंडपदे ऽ वांतरपदस्थो ये ध्यस्वंडपदे स्यो
येन मानं पूर्वोत्तरपदशब्दयोराद्यावयवात्मवयव पदयोरेव रूढेरितीदं चिंत्यं गतार्थः इति व्या
ख्यातार्थ्यत्विनशं कानास्यदामित्यर्थः ॥ अदसो मात् आरंभसामर्थ्यादिति न चानुकरणे प्रकृति
वदित्यस्य वैकल्पिकत्वे वादः २ शब्दत्वादसिद्धत्वाभ्यमप्यानुपलस्य तत्र सार्थकमिति वाच्यं तत्र पूर्वसू ७६
त्रेणैव सिद्धेः प्रकृतिवदित्यस्यानित्यत्वादिति भावः एतच्च भाष्ये ध्वनितं प्रकृतसूत्रे पर्युदासश्चेति

नन्वेकारांतस्यानुनासिकविधिरष्टा असत्वात्कथमेतत् मुत्वविधेः पूर्वत्वेनानुनासिकात्पूर्वमेवप
रत्वात् आते च मुत्वे तस्यासिद्धत्वेन संज्ञाया अभावात् पूर्वसूत्रे यथोद्देशपक्षाश्रयणादिति चेन्न
श्रुतसंग्रहाय यथोद्देशाश्रयणेपि श्रुतातिरिक्ते कार्यकालत्वे नादोषः इत्याशयात् नह्येकपक्षेणैव स
कलमिष्टं साध्यमिति राजाज्ञास्ति स्यानिवत्सूत्रेसु संज्ञायां पक्षद्वयस्य एव दर्शितत्वात् भाष्यका
रेण श्रुतसंग्रहायैव यथोद्देशाश्रयणादन्यत्र यथेष्टाभ्यनुज्ञानात् यद्वा यथोद्देशपक्षे मुत्वात्पूर्व
मेकारान्ते संज्ञायाः प्रकृतिभावफलिकाया — अयादिनिरासार्थं प्रवृत्तत्वेपि मुत्वे सति पूर्वसूत्रा
माभावेपि पूर्वसूत्रप्राप्तिविषयपुष्टिवचनार्थमारभ्यमाणोत्तरसूत्रस्यापहृतौ मानाभावेनानुनासि
कयपुर्हासः सिद्ध एवेति भावः कार्यकालेतु लिंगात्रयेपि पूर्वसूत्रेणैवानुनासिकयपुर्युहासः सिद्धः एवं

च बहुवचनार्थं पुंद्विवचने प्रकृतिभावार्थं चैतत्सूत्रमिकीनः पंथाः अवधेयमिति अवधानं बहु
११ नां संग्रहपरिहाराय यथोद्देशपक्षस्याकृत्वेन कार्यान्तरे वर्त्तव्ये होषाभाववत्पक्षाश्रयणमिति ह
११ रदत्ताशयः प्लुतात्प्रागेवेति प्लुतस्यासिद्धत्वात्संज्ञाप्रवृत्तौ प्लुतस्याप्रगृह्यत्वात्पर्युदासो न स्यादि
ति भावः यावद्बाधमिति वाधकत्त्व पर्युदासार्थं यथोद्देशपक्षाश्रयणेपि प्लुतात्प्राक्संज्ञाप्रवृत्तौ मा
नाभावः पूर्वं प्रवृत्ति कल्पिताभूतायाः प्लुते प्रगृह्यस्येति पर्युदासाप्रवृत्तेः कार्यकालपक्षेसु
नभत्वाद्यथोद्देशपक्षाश्रयणं व्यर्थं किंच संज्ञायाः विधेयंगवहार्थेपि स्थापने नैवफलवत्वात्प्र
हार्थोपस्थितिरिव फलं सुगमं अनुनासिकप्रवृत्तिस्तु शास्त्रप्रवृत्ति फलं एवं चानुनासिकप्रवृत्तस्यार्थं ११
संज्ञायाः पूर्वं प्रवृत्तिर्निरिति निरिमं वचः तदुक्तं विधेयर्थस्योपपत्त्यर्थं यस्योपायस्य कल्पं तस्यापि

धंगतैवस्यात्रानार्थत्वमप्रकल्प्यमिति किंच संज्ञायाः संज्ञिसमर्पकत्वेनैव विधेयांगत्वमित्यनुनासि
कग्रहणस्यैव पूर्वं श्रवणस्यानुपपन्नत्वेति प्रसंगः फलाभावादिति अनुनासिकग्रहणेः संज्ञाविनापि द
धीत्वाहो इत्यत्वादप्रयासिद्धत्वात्संज्ञायां तत्कारणत्वाग्रहे संज्ञाफलत्वाभावादिति भावः प्रव
त्तिरेव फलमिति ऋतुनाऽप्यात्र प्रवृत्तप्रगृह्यत्वस्याविधित्वेन तु तेऽपि रेडुमशक्यत्वात्तु तस्या
प्रगृह्यत्वादनुनासिकग्रहणे संभवात्सैव पूर्वग्रहणसंज्ञाफलमित्यभिमानः अग्रहणाविति अ
न्वयव्यभिचारान्न सा संज्ञाफलमिति भावः ननु यथा अश्रूयमाणफलकविधिविशिष्टसामान्य
स्य फलवत्त्वकल्पनया भावनायाः अंशत्रयवत्त्वसंपत्तिस्तथा प्रयोजनसामान्योद्देशेन संज्ञाग्रह
त्तिरितियथोद्देशपक्षस्वरूपस्यैकपदादिभिर्वीलेर्तत्वात्सामान्यांतर्गतानुनासिकग्रहणत्तिरेफ

स्वमित्यत आह प्रत्यय इव प्रयुज्यत इति । अयं भावः भाव्यसामान्यमादायांशत्रयोपपादनेऽप्याधि
१८ वाधिक्ये भाव्यविशेषे विधिपर्यवसानं तथापि विध्यंगपर्युदासरूपफलस्य विधितदुपस्थितत्वे
७८ न फलस्य विशेषनिर्णयसंभवात् सकलत्वमेव संज्ञायाः यद्यप्यनुनासिकत्वस्य कस्यापि विधितए
वोपस्थितात्तथापि पर्युदासप्रतियोग्युपस्थापनेन फलवत्याः संज्ञायाः स्थाने पर्यायोऽनुनासिकत्व
हानिफलकत्वात् सन्नायाभ्येनोचित्यादिति ननु अप्लुतवद्भावेऽपि प्लुतस्यासिद्धत्वात् त्रिमात्रापहा
राभावात् गुणे कृते प्लुतश्रावणापत्तिरत आह अंतरंगत्वादिति गुणस्य द्विमात्रवृध्या त्रिमात्रस्था
नेजातत्वान्न प्लुतश्रुतिरित्यर्थः न्यायादिति अप्लुतवदुपस्थितइत्यप्लुतवद्भावारंभादित्यपि १८
बोध्यं यथोद्देशपक्षस्यैवेति प्लुतसंग्रहार्थमिति शेषः यद्यपि कार्यकालपक्षे प्लुतप्रगृह्यादस

ञाद् सोमादिसस्यो पस्थिति सामर्थ्योत्स्वर संध्यभावः सूत्र पाद स्तथापि प्लुता संग्रह एवस्यादि
ति बोध्यं एवं चाव श्यं यथोद्देश पक्षाश्रयणे संज्ञापक्षस्या परत्वान्मुत्व मी — योरसिद्धत्वाद् या
द्यादेश पूर्वरूपादि प्रसंग इति भावः अदसो वेसे वेति यत्त्व — — प्रगृह्याद् सोऽनुनासिक इति
न्यासोपुक्तः नन्वहृद्यो पादानयो गविभागाभ्यां गोरवादिति तन्न प्रगृह्यत्वादः शब्दसंबंधि
भिन्नस्याणाइस्सर्थे दं ह्नासाधुत्वापत्तेः संबंधित्व लक्षणयाइं द्वोपपादने तु लक्षणापेक्षया
स्यहृदर्थे नमूहृद्यो पादानं अदसो सेरितिवत् आदृत्स्यान दस्य सोऽयस्मे सर्यात्स्त्वि यामसु
काइस्य चनानुनासिक इति केचित् संज्ञापूर्वक विधेरानेत्सात्वान्नामुकाइस्यान्नासुकाइस्या
द्यावनुनासिकः अत एवानुनासिकसंज्ञा सूत्र प्रणयन मित्यपि केचित् नाजानंतर्य इति अ

यादेशाद्युत्तरकालत्वाद्धसिकेऽजानंतर्यसत्वान्निषेधप्राप्तिः युगपदिति विप्रतिषेधे परमे
१९ वकार्यमिति नियमादिति भावः शे शित्वादिति यद्यप्यानुपूर्व्यादनेकाल्त्वात्सर्वादेशत्वं युक्तं
79 तथाप्यजवसंतुपंथाइत्यादौ जसः सेरादेशस्य सर्वादेशत्वार्थं सुपां सुलुगिति सूत्रे शका
रप्रश्लेषेणतस्य च पूर्वनिरशेषत्वेन शित्वादेव सर्वादेशते सर्थइति केचित् अनुबंधत्वयोग्य
शकारवत्वेनानुबंधकृतमनेकाल्त्वमिति निषेधाच्छित्वात्सर्वादेशत्वं अत एव काशिकोनेवि
वरस्यइति भट्टाः जसः शी अनेकाल्त्वात्सर्वादेश इति प्रत्ययस्य प्रत्ययाधिकाराभावेन वाक्यार्थ
निष्पत्तिकाले प्रत्ययादित्वज्ञानाभावादनुबंधत्वयोग्यत्वस्यानिश्चितत्वादनेकाल्त्वेन सर्वा ७९
देशत्वं काशिकोक्तप्रत्ययाधिकाराद्वाक्यार्थनिष्पत्तिकाले एव प्रत्ययसंज्ञाविशिष्टोपस्थितेरप्र

स्य यादित्वज्ञान सत्त्वेनेत्संज्ञायोगपक कारादिमत्यज्ञानादित्संज्ञक क कारादि यान् प्रत्ययो भवती स्यर्यो
त्का णोर्नविकल्प इति भाष्यकृत्: निपातन एकाजनाङ्· ननु पर्युदासार् अपनिपातत्वाभावे एकाज्ग्रहणसा
मर्थ्याद्धतु श्रीहिरेव व्यपदेशिवद्भावमाश्रयसंज्ञोत्वारणो यपर्युदासोऽन भ्योह व्याहरतीति सुपूर्वक
मिति सिद्धत्वावस्थो प्रसिद्धेः प्रकृतिभावाभावातो फलाभावात्संज्ञापि हलंते नेति भावः नतरामिति
असंभवोऽभावप्रकर्षः शंकानिरासार्थमिति ननु शंकाया अप्रयोजकत्वादेकग्रहणं वैयर्थ्यं दु
रुद्धरमिति चेन्न अधिकशब्दत्वात्स्वरूपामि शास्त्रेपदनर्थकं स्यादिति भाष्योक्तेः शास्त्रोपयोगपर्यंतर
बोधनायैकग्रहणमित्याह कुर्वन्नसापयतीति कुर्वन्निति पदमप्येवं सार्थ्यं भवति जातिवाचकत्वा
दिति· आत्माश्रयानेकव्यक्तिवाचकत्वादिति भावः अन्यथा जातिग्रहणेपि जातेरेवैकव्यक्तिव्याप्त

याऽसंगतेः समीपो योह स्विति । अवहितस्यापि सामीप्यानपायाद्वैस्य मेतत् । समीपवाचित्वं तश
१० ४० व्दादीनामव्यवहिते एव शक्तिरिति न दोषः अत्रेदमेव भाष्यं मानं अतो ल्रेतिस्सूत्रस्थं च । न ततः
परः भकारेण व्यवधानात् न स्यादिति नन्वं ते वासीत्साहावंतशब्दस्य व्यवहितेपि दर्शनात्वितं
स्यादेवेति चेन्न अत्र प्राहुः वर्णांतरे वर्णांतरसामीप्यस्य कालकृतस्यैव संभवात्तदुच्चारणका
लाव्यवहितकालवृत्त्युच्चारणविषयत्वस्य वर्णांतराव्यवहितएव संभवादिति । स्वायानिति । प
रे तु स्वांगसमुदायस्य स्वांगग्रहणेनेव निपातसमुदायस्य निपातग्रहणेन ग्रहणं अवयवानाम
नुपयहार्थत्वेन काकदन्तवन्न्यायोत्र सुगमः एवं कथं सूत्रचारितार्थ्यात् तस्मात्तितउशब्दे कृते १०
श अउ शब्दानुकारेण अनिति परे निपातसंज्ञके अउ अकारो दि साहो प्रगृह्यत्वं स्यात्तद्वारणा

येकग्रहणमित्यूचुः नन्व अनाङि· ति पर्युदासे न प्रतिपदं पठितं निपातानामेव ग्रहणात् हे
अ आगस्त्वेति द्व्याङ्‌ तत्त्वाविवक्षया वाक्यात्तत्त्वाभावाद्धानस्तुतः वक्ष्यमाणत्वादिति दृश्यमोन्वा
देशाइत्यत्र ॰ ओत् नप्रवर्त्ततइति ननु गोभ्यामित्येन दृश्यटकं गोदृत्स्य स्यानुकरणे लोपस्यैव
वल्यिकत्वेनप्राप्तेोवृत्तिः सुयाजेति चेन्न भक्ते· स्वादिप्रत्ययस्यतद्‌लोपस्य विरहप्रयुक्ताप्राप्त
परत्वस्यातिदेशेन यत्तरे तेभ्यइ स्यादाविवक्षकृति सन्नाबाधनेप्यित्वादिप्रत्युदूयादेर्वोधनस्य
कर्त्तुमशक्यतयाऽतिदेष्टुमशक्यत्वात् परत्वस्य यस्मात्प्रत्ययविधिस्तदादीति दिदं तत्वरूपत्वा
तदित्याहुः विप्रतिषेधसंभवादिति नचसंबुद्धिग्रहणाभावे ओरंतनिपातस्यैवैतोविकल्पः स्या
दिस्यपवादत्वेनविप्रतिषेधोक्तिरसंगता एवं च निपातग्रहणामनुवृत्तितास्पर्यग्राहकत्वे वसं

बुद्धिग्रहणस्य पुनेति वाच्यम् ओग्रहणं कृत्वा आङ्ग्रहणानुवृत्त्यैव सिद्धे पुनरोग्रहणेन तदन
८१ नुवृत्तिसिद्धेरिति भावः नचैवमप्याबन्धाच्छतिरिक्ते संज्ञानामबाधस्योक्तत्वात् परत्वादित्यसंग
८१ तं ज्ञापकस्याविशेषविषयत्वेन सं ज्ञाभेदविषयत्वात् एकत्वेकेवला इति शब्दनिरूपेक्षत्वे
नांतरंगत्वात् ओदित्येव युक्तमिति तु न वाच्यं निपातसंज्ञासापेक्षत्वे न समत्वात् अंतरंगेक
नैव बहिरंगस्य दुर्बलत्वाच्च नचैवमेतदभावे पूर्वसूत्रं दुर्बलं इति शब्दातिरिक्ते ओदित्यस्य नि
पातातिरिक्ते संबुद्धावित्यस्य चारितार्थ्येन सामर्थ्याभावादिति वाच्यं परत्वेन विकल्पे प्रवृत्तो
विकल्पस्याभावपर्यंतमपि व्यापारान्नित्यविधेस्तदभावे अप्राप्तेः अत्र च संबुद्धिग्रहणमेव ८१
मानं अत एव नयदि विभाषा साकांक्षेति निषेधो यो भयत्र विभाषेति संगच्छते अन्यथा प

रत्वादेतस्य ग्रहणावश्यनेननिषेधाभावेपूर्वसूत्रस्यदुर्वारतापत्तौसादुर्निर्भास्यात् साकांक्षेविष
येयद्योगेविकल्पानापत्तेश्चस्पष्टंचेदंनवेतिविभाषेतिसूत्रेभाष्ये ननु उञिनीति उआए का
देशस्त्वनभिधानान्नेतिभाष्याशयः समाहधीतेति आङ्‌नाङोरेकादेशस्याप्यसंग्रहापत्तिः
लाक्षणिकत्वात् तथाचसूत्रवैयर्थ्यमेवस्यात् एतत्सामर्थ्यात्परिभाषाया अप्रवृत्तौनुअ
तोभवदित्याद्यदोषइतिभाष्याशयाभ्युच्चयपतापुनैव ओषुयात मित्याद्यौपूर्वेलक्ष्यसिद्धत्वात्तइसा
शयः ओइतीति समासएवेतिवक्तुंशक्यमिति चेंसम्य पराक्त्ताइति निपातस्यप्रतिषेधानु
पपत्तेः वक्ष्यामइति प्राधान्येएवाग्रहणे आदेचउपदेशेऽशितीत्युपदेशग्रहणस्यवर्णग्र
हणेनदृग्रहणेस्थापकतापराकरणंपविरोधइति उपदेशेएजन्तस्यधातोरिति तदर्थात्॥

अभ्युपेत्येति उपदेशग्रहणेन तत्र स्थले प्रतिपदोक्त परिभाषाया अनित्यत्वमेव ज्ञाप्यते नतु वर्ण
८२ ग्रहणेऽप्रवृत्तिरिति भावः भाष्योक्तसमाधिमाशंकते नन्विहेत्यादि तथा च भाष्यं गौणमुख्ययो
81 र्मुख्ये कार्यसंप्रत्यय इति तद्यथा गोरनुबंध्यो जोऽग्नीषोमीय इति न वाहीको नु बध्यत इति अथ
मर्थः स्वरूपमिति रूपग्रहणेनार्थग्रहणस्यापि बोधितत्वादर्थवतः कार्येण भवितव्यं अर्थश्च
द्विधा मुख्यो गौणश्च तत्र स्वशक्तिविषयो मुख्यः गौणस्तु सादृश्यनिमित्तकवृत्तिविषयः गुण
निमित्तकवृत्तिविसंबंधित्वेन शब्दवदर्थेऽपि स्यात् लाक्षणिकगौणपदप्रयोगात् तत्र प्राथम्यान्मुख्या
र्थस्यैव ग्रहणं ह्रस्वेन रस्य तद्बाध एव समुदायात् शक्यार्थभानस्यापि तत्राभ्युपगमेन न तत्स्वे ८२
विकत्वाच्च शक्यसमवेतगुणप्रकारकबोधत्वस्यैव स्वशक्यगुणवत्तारूपवृत्तिज्ञानकार्यता

वच्छेदकत्वोपगमात् ततश्च गोऽभवदित्यत्र प्रकृतेरेव कार्य्यत्वं संधीभवंतिरवगाः पटीभवं
तीतं तवइत्यादौ वचनव्यवस्थायास्त्वन्नुपपत्तिश्चैत्रः मन्नवस्मित्वं त्वन्नौवाम्यहमित्यादौ पुरुषव्य
वस्थायाश्च ततएवोपपत्तेः प्रकृतित्वमत्रारोपविषयत्वं बोध्यं तत्र च गोत्वादिकमारोपितमेव
न मुख्यमिति न च गौणे गुणानामेव प्रवृत्तिनिमित्तत्वाभ्युपगमात्कथं वाहीकादौ गोत्वारोप इति
वाच्यं स्वोत्कर्षस्य प्रभावारोपविषयीभूतार्थवृत्तित्वं गौणत्वमिति मतेन तदुक्तेः अत्र हि शब्द
स्य स्वाभिधेयं विनाऽन्यत्र गुणयोगमात्रेण प्रवृत्त्यभावात् आरोपविषये विषयितावच्छेदक
धर्मस्यैवारोपः न च विविक्तत्वेन तदनुपपत्तिः शुक्तिकादौ चाकचिक्यादिसादृश्येन रजतत्वा
द्यारोपवत् यथा चाव गौतमाग्निरिति पंचाग्निविद्यायां रेतो रूपहविः प्रक्षेप रूपहोमाधिकर

णात्व सादृश्येन योषायामग्नित्वारोपवत् जाड्यक्रूरत्वादिसादृश्येन वाह्हिकमाणवको वै गौ गौ त्व
८३ 83 सिंहत्वाद्यारोप इति अभिप्रेत्याह च्विप्रत्ययस्य लै इति ते नान्यत्र नियमाभाव इति भावः अतए
व सुवर्णैरखदिरांगारसदृशौ कुंडले भवत इति यस्य भार्यायां भाष्यं संगच्छते एकोऽह्स्वः पंचमो का
भवति अतत्वं तत्वं संपद्यते इति वाक्यप्रकृतेरपि कर्तृत्वदर्शनात् • अत्रेदं वोध्यं यत्र प्रकृतिरेव वि
कारसादृश्यमापद्यमाना विवक्ष्यते तत्र च्विप्रत्ययः कृभ्वस्तियोगे संपद्यकर्तरि च्विरभूततद्भाव
इति वक्तव्यमिति सूत्रवार्त्तिकतद्भाष्यबलात् अतथाभूतस्य तथाभवने कृभ्वादियोगे संपद्यर्थ
क्रियाकर्तृत्वेन संपदेऽभिवेशः निपातनात् संपद्यस्य कर्त्रेति षष्ठीतत्पुरुषः विवक्षितार्थवाच ८३
कात् च्विरितितदर्थः विकारवाचकात्व सादृश्येन प्रकृतौ वर्तमानादयं प्रत्ययः करोत्यादिक्रि

याकारकत्वं प्रकृतिभूतस्यैव विकारसादृश्यं प्राप्तस्येति बोध्यं अतएव वचनपुरुषव्यवस्था
एतदुक्तं हरिणा पूर्वामवस्थामजहत् संस्पृशन्धर्ममुत्तरं सम्मूर्छित इवार्थात्मा जायमानोऽभिधी
यत इति अस्यार्थः पूर्वावस्थां कारणावस्थां धर्ममुत्तरं कार्यावस्थां एवं चावस्थाद्वयावच्छि
न्नमेकं वस्तु पूर्वावस्थानुगुणेनेतरावस्थामाप्नुवन्मुख्यं विकाररूपमिव प्राप्तं जायत इत्यभि
धीयते असंघः संघो भवतीत्यादौ अत एव प्रकृतिविकृत्योः समानाधिकरण्यं नन्वेवमुभयोः
कर्तृत्वापत्तिरत आह सव्यापारतरः कश्चित्क्वचिद्धर्मः प्रतीयते संसृज्यन्ते च भावानां भेदवंसोपि
शक्तय इति अस्यार्थः स्वस्वानुसाराद्वाक्ये विकृतेरेव साक्षात्कर्तृत्वं वृत्तौ प्रतीयते विवेके च
प्रकृतेरेव साक्षात्कर्तृत्वं अतत्त्वं संपद्यत इत्यर्थेऽभिव्यज्यते इति च भवितव्यमिति सुष्ठ्युपपद्यते इ

तिसूत्रेभाष्योक्तेः अयमेव प्रकर्षस्तत्र पोक्तः संसर्गः कर्तृशक्त्योरेकवृत्तित्वरूपः अत एवात्वं
८४ त्वंभवतित्वम्भवतीत्यादौ प्रकृतेः कर्तृत्वात् प्रथमपुरुषः त्वमहं भवसीत्यर्थे अत्वम्भवसीत्ये
84 ववाक्यंतुसास्साद्विकारस्यैव सुवर्णपिंडः खदिरांगारसदृशे कुंडले भवतद्रुति भाष्यप्रयोगे विकृ
तेकर्तृत्व किंच द्वंतेन वाक्ये च प्रकृतिरूपमनारोपितं विकाररूपं त्वारोपितं आरोपितानारोपि
तसमभिव्याहारे अनारोपितस्यैव कारकत्वप्रतीतेः आरोपितस्यावस्तुत्वे नक्रियाजनकत्वरूप
कारकत्वाभावात् द्वयोरपिवस्तुत्वेतु विकारस्यैवमुख्यतयाजायमानत्वादिनातस्यैवसाक्षात्कृ
र्तृत्वं प्रकृतेस्तुतदभेदेन तद्वाराकथंचिदिति न कदापि सुवर्णपिंडाश्रयाविभक्तिरिति बोध्यं एव ८४
च विकृतेः प्रकृतेर्वापियत्रोक्तत्वं द्वयोरपिवाचकः प्रकृतेः संख्यांगृह्णाति विकृतेर्नेत्विति प्राची

नप्रवादश्च्विप्रत्ययविषयक एव च्विप्रत्ययांते सादृश्यमूलाभेदाध्यवसायेन विकाराभेदमापन्न
प्रकृतेः कर्तृत्वेनोभयोरप्यन्वयं महद्भूता ब्राह्मणी स्यादित्यादौ सामानाधिकरण्यं गौणत्वं चेति बोध्यं
अनारोपिता तथाभूते आरोपिततद्भावसंपत्तावेव च्विः अत एव च्व्यंतार्थस्य गोभवदित्यादौ गौ
णत्वेन नञ्ग्राह्यत्वाभावसिध्यर्थं तत्पूर्वं तस्य प्रतिषेध इति वार्तिकं प्रत्याख्यातं अगोत्वारोपपूर्वकगो
त्वबुध्या च्वौ गोभवदित्यादौ च्व्यंतप्रतिषेधस्यावश्यकत्वे तदसंगतिः स्पष्टैव एवं च कारणीभूतो दंड
दुत्पादेश्च्विप्रत्ययोऽसाधुरेव अकारणत्वाद्यारोपपूर्वककारणत्वादिबुध्या च्विरिति नु न युक्तं पूर्वोक्त
भाष्यविरोधात् सादृश्यमूलकविकाराभेदप्रतीतावेव च्विप्रवृत्तेः ब्रह्मीभवतीत्यत्र भवनकर्तृत्वं प्र
कृतिभूतस्याब्रह्मण एव विकाराभेदेनेति केचित् अन्ये तु ब्रह्मणि विकारत्वासंभवेनात्यंतस्वार्थि

कश्चिच्छ्रुतं दस्या इति प्राहुः एतत्सर्वं सूचितं सिद्धांतस्थितिरित्यनेन वाहीकादिषु नेः गौण्यारोपेणेतद्धु
८५ नेः आख्येयमिति एवं च विशिष्टरूपोपादानाभावइति भावः यत्तु वदंति केचिद्भट्टादयः तेषाम
यमाशयः स्वार्थैकवृत्तिमानात्प्रातिपदिकाद्विभक्त्यावुत्पन्नायां कार्येषु भूतेषु शब्दांतरसंनिधानात्
गौणत्वं प्रतीयते गोभवदित्यत्रतु गौणत्वं द्विप्रसयोत्क्षयस्यार्थप्रागेव अन्यथा द्विप्रसस्यानुत्पत्तिप्रसं
गात् किंच गुणक्रिययोः श्रौतः क्रियासंबंधः श्वेतं छागमालभेतेत्यादौ वाक्यीयान्तुन्यायात्परस्प आकांक्षादिमूलक शक्त्या।
रेण श्वेतस्याश्रयापेक्षायां व्यक्तिवचनानामिति न्यायेन छागपरत्वं छागस्य च गुणाकांक्षायां श्वे
तपरत्वमिति पार्ष्णिकः परस्परावच्छेदः शाब्दान्वयस्तु क्रियायामेवेति भाट्टसिद्धांतः एवं गौर्वा ८५
हीक मानयेति पूर्वं क्रियासंबंधापेक्षयाविभक्त्यावुत्पन्नायां पश्चात्सामानाधिकरण्याद्गौणार्थप्रा

दुर्भीवो भवतीति तदेतदुक्तं भाष्यकृद्भिः यत्तु शाब्दाश्रयं न खलु स्वमात्रे भवति शाब्दाश्रये च व्य
ह्यात्वेइत्तीति भागे चेति तत्पक्षे वाक्यघटकपदानां वाक्यशक्तिस्वीकारेण गौणार्थकत्वेन लक्षण
पदानामेव संस्कारात्पूर्वमेव गौणार्थत्वावगतिरित्यर्थः श्रौत इति विभक्त्यर्थस्य क्रियाकारक
संबंधरूपत्वेन तयोः संबंधश्रुतिकृत इति श्रुतेर्वाक्यादेः स्याशीघ्रप्रवृत्त्या प्रथमं तयोरन्वयवो
धः एवं गौवाहीकमानयेत्यादावपीति भावः तदपि नेति अरुणया त्रैहायणीति वाक्ये गुणमात्र
स्य क्रयसाधनत्वानुपपत्त्या तदर्थं भागे वक्रयसाधनत्वं स्वाश्रयद्रव्य द्वारकपरंपरया क्रयसाध
नत्वमाश्रित्य तृतीयोपपत्तिरित्यर्थः अयोग्यतानिश्चयस्य शाब्दबोधप्रतिबंधकत्वेपि तृतीयो
सत्त्वाप्रतिबंधकत्वात् क्रियान्वयाय चेति गुणवाचकत्वेन परंपरयापि क्रियान्वयस्य कल्प्य॥

ख्यातुमशक्यत्वादितिभावः एवंच पूर्वमेव गौणत्वागतेराख्यातार्थनापत्तिरित्याशयः करोपीति द्वि

९६ तीयादेः सामान्यतः क्रियासंबंधज्ञानापेक्षत्वात् नतज्ज्ञानमूलक द्वितीयाद्युत्पत्तौ गौणपदार्थ

स्यवाहीकान्वयः एवंच कर्मणोरेव विशेषणविशेष्यभावो न तु विशिष्टस्य कर्मत्वमिति भावः

नक्षमायास्यद्इति शब्दष